CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 759

Title Citradīpa vyākhyā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 759 Subject : Vedānta

Title : Citradīpa vyākhyā

Author : Vidyāraṇya Scribe : –

Date of the work : – Date of the Ms. : –

Place of the work : – Place of the Ms. : –

Size : 11.2" by 5.2" Extent : 49" foll.

Language : Sanskrit. Script : Devanāgarī

Remarks : —

॥ ॥

श्रीआ ॥ ॥ ईशैविन्नपप्रारंभ १॥

प॰ द॰ श्री
१

॥श्री [illegible] नमः॥ ॥शुक्लाम्बरधरं देवं शशि[illegible]चतुर्भुजं प्रसन्नवदनं ध्यायेत्सर्वविघ्नो
पशान्तये १ यस्य स्मरणमात्रेण विघ्नाद्दूरं प्रयाति हि वन्दे हं तं तिवक्रं तं वांछितार्थप्रदायकं
२ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ क्रियते चित्रदीपस्य व्याख्यातात्पर्यबोधिनी ३
चिकीर्षितस्य ग्रंथस्य निर्विघ्नतूहपरिपूरणाय परमात्मनीतियद्वेने ह्र देवतातत्त्वानुसंधानं
ह्लणं मंगलमाचरन्नस्य ग्रंथस्य वेदांतप्रकरणत्वात्तदीयैरेव विषयादिभिस्तद्वत्तासि
न्नसिनिधायत्वध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यते इति न्यायप्रदर्शनपरमात्मत्व
[illegible] चित्रपटसदृश [illegible] प्रतिजानीते श्रीशासानंदायगुरवे नमः

राम॰
२

[illegible] मा [illegible]न्नुपिवद्द [illegible]
[illegible] णंतराधातकयोरप्यवस्थाचतुष्ट[illegible] कमेण
[illegible] नाजि [illegible] कारा अंतस्त्रो वस्त्रा यथा चित्रपटे उपलभ्यं
यथा चित्रपटे दृष्टमवस्थानां चतुष्टयं [illegible] परमात्मनि विज्ञेयं तथावस्थाचतुष्टयं १ यथा धौ
तो घट्टितश्च लांछितो रंजितः पटः चिदंतर्यामिसूत्राणि विराट् चात्मा तथेर्यते [illegible] वतः
श्चौतो त्वधौतस्या तु घट्टितो न्नविलेपनात् मष्याकारे लांछितः स्याद्रंजितो वर्णपूर्णतः २
तत्र [illegible] स्वयंचिदिदं तर्यामिसूत्रात्माविराट् चेत्यवस्थाचतुष्टयं बोद्धव्यमित्यर्थः २ दृष्टांतस्थि
तानाम [illegible] पकरण [illegible] दर्शयति स्वतः [illegible] स्वतश्शास्त्रवस्थासु मध्ये स्वतो दृश्यांत
रसंबंधविना शुद्धो धौत [illegible] रंजितः मषीमयैराकारैर्युक्तो लांछितः यथा
योग्यं [illegible] नौ [illegible] यति

दार्ष्टांतिके तास्तु तात्पर्यतिस्वतइति परः परमात्मा मायातत्कार्यरहितश्चिदित्युच्यते मायायोगादंतर्यामी अपंचीकृतभूतकार्यसमष्टिसूक्ष्मशरीरयोगात्सूत्रात्मा पंचीकृतभूतकार्यसमष्टिस्थूलशरीरोपाधियो गाद्विराडिति ४ ननु परमात्मनश्चित्रपटस्थानीयत्वेन ह्याश्रितानि चित्राणि वक्तव्यानीत्यत आह ब्रह्मा

स्वतश्चिदंतर्यामी तु मायावी सूक्ष्मसृष्टितः सूत्रात्मा स्थूलसृष्ट्यैव विराडित्युच्यते परः ४ ब्रह्माद्याः स्तंबपर्यंताः प्राणिनोऽत्र जडा अपि उत्तमाधमभावेन वर्तंते पटचित्रवत् ५ चित्रार्पितमनुष्याणां वस्त्राभासाः पृ[illegible]पृथक् चित्राधारेण वस्त्रेण सदृशा इव कल्पिताः ६

द्याइति अत्र परमात्मनि उत्तमाधमत्वेन वर्तमानब्रह्मादिस्तंबपर्यंतचेतनात्मकगिरिनद्यादिजडांतं च चित्रस्थानीयमित्यर्थः ५ ब्रह्मादिजगतश्चेतनस्थानीयत्वे कारणवत्तु दृष्टांतमाह चित्रेति यथा चित्रे लिखि तानां मनुष्यादिशरीराणां मेव नानावर्णोपेता वस्त्रविशेषा लिख्यंते ते च शीताद्यनिवारकत्वाद्वस्त्राभासा एव ६ दार्ष्टांतिकमाह राम० २

पृथगिति एवं परमात्मन्यारोपितानां देवादीनां शरीराणामेव नामानश्चिदाभासाः प्रत्येकं कल्प्यंते न पर्वतादीनां तेषां कल्पनेकारणमाह बहुधेति अमी जीवा देवतिर्यङ्मनुष्यादिशरीरस्था बहुधा संसरंति न परमात्मा तस्य निर्विकारत्वादित्यभिप्रायः ७ ननु देवदत्तादिर्नो लोके काश्यां मनष्ट्व[illegible]तारइति विवदंति नत्र किं

पृथक् पृथक् चिदाभासाश्चैतन्या[illegible]देहिनां कल्प्यंते जीवनामानो बहुधा संसरंत्यमी ७ व स्त्राभासस्थितान्वर्णान्यद्वदाधारगान् वदंत्यज्ञास्तथा जीवसंसारं चिद्गतं विदुः ८ चित्रस्था पर्वतादीनां वस्त्राभासो न लिख्यते सृष्टिस्थमृत्तिकादीनां चिदाभासस्तथा नहि ९ संसारः परमार्थोऽयं संलग्नः स्वात्मवस्तुनि इति भ्रांतिरविद्या स्याद्विद्ययैषा निवर्तते १०

कारणमित्याशंक्याज्ञानमेव कारणमिति सदृष्टांतमाह वस्त्राभासेति ८ गिरिनद्यादीनां तु चिदा भासकल्पनाभावं दृष्टांतः पुरःसरमाह चित्रस्थेति प्रयोजनाभावादिति भावः ९ एवमात्म न्यारोपितस्य संसारस्य ज्ञाननिवर्त्यत्वासिद्ध्यर्थं तन्मूलभूतामविद्यामाह संसार इति १०

केयं विद्या तल्लाभोपायश्च क इत्याकांक्षायां विद्यास्वरूपं तल्लाभोपायं च दर्शयति आत्माभासस्येति चि
दाभासस्येत्यर्थः ११ विचारो लभ्यते बोधेत्युक्तं कस्य विचारो लभ्यते विधेयत्याशंक्याह सदेति ननु
परमात्मा विचार्यतां मोक्षावस्थायां फलरूपेणावस्थानात् जीवजगतोर्विचारः कोपयुज्यत इत्याशंक्य तयो

आत्माभासस्य जीवस्य संसारो नात्मवस्तुनः इति बोधो भवेद्विद्या लभ्यतेसौ विचारणात् ११
सदा विचारयेत्तस्माज्जगज्जीवपरात्मनः जीवभावजगद्भावबाधे स्वात्मैव शिष्यते १२ निर्प्र
नाप्रतीतिस्तयोर्बाधः किंतु मिथ्यात्वनिश्चयः नो चेत्सुषुप्तिमूर्छादौ मुच्येतायत्नतो जनः १३

र्बाधनेन परमात्मावशेषण उपयुज्यत इत्याह जीवभावेति १२ ननु जीवभावजगद्भावबाधे स्वा
त्मेव शिष्यत इत्युक्तं विचारेण जीवजगतोर्बाधे तदप्रतीत्या व्यवहारलोपः प्रसज्येतेत्याशंक्य बाधश
ब्दस्य विवक्षितमर्थं विपक्षे दंडं चाह नाप्रतीति सुषुप्तिमूर्छादौ स्वत एव द्वैताप्रतीतेस्तत्त्वज्ञानं विना
पि मुक्तिः स्यादित्यर्थः १३

स्वात्मैव शिष्यत इत्यनेन नापि परमात्मनः सत्यत्वज्ञानमेव विवक्ष्यते न तद्व्यतिरिक्तजगद्विस्मृतिर्जी
विन्मुक्त्यभावप्रसंगादित्याह परमात्मेति १४ सदा विचारयेदित्युक्त्वा देहपातपर्यंतं विचारप्रसक्तौ
समाप्तेरवधिमाह परोक्षा चापरोक्षेति १५ विचारजन्या विद्या परोक्षत्वापरोक्षत्वभेदेन द्वेधे

परमात्मावशेषोपि तत्सत्यत्वविनिश्चयः न जगद्विस्मृतिर्नो चेज्जीवन्मुक्तिर्न संभवेत् १४
परोक्षा चापरोक्षेति विद्या द्वेधा विचारजा तत्रापरोक्षविद्याप्तौ विचारोयं समाप्यते १५
अस्ति ब्रह्मेति चेद्वेद परोक्षज्ञानमेव तत् अहं ब्रह्मेति चेद्वेद साक्षात्कारः स उच्यते १६ त
त्साक्षात्कारसिद्ध्यर्थमात्मतत्त्वं विविच्यते येनायं सर्वसंसारात्सद्य एव विमुच्यते १७

त्युक्तं १५ तयोरुभयोः स्वरूपं क्रमेण दर्शयति अस्ति ब्रह्मेति वेदेति १६ एवंविधात्मसाक्षात्कार
साधारणकारणमात्मतत्त्वविवेचनं भवतीत्याह तत्साक्षात्कारेति येन साक्षात्कारेण पुमान् स
द्य एव विमुच्यते तत्साक्षात्कारसिद्ध्यर्थमिति पूर्वेणान्वयः १७

चिदात्मनः पारमार्थिकमेकत्वं निश्चेतुं व्यवहारदृशायां प्रतीयमानं चैतन्यभेदमुद्दिशति कूटस्थ इति ए
कस्मिन्नेवात्मनि चातुर्विध्ये दृष्टान्तमाह घटाकाशेति १८ घटावच्छिन्नस्य घटाकाशस्य तदनवच्छिन्नस्य
च महाकाशस्य प्रसिद्धत्वात्तौ विहायाप्रसिद्धं जलाकाशं कल्पयति घटावच्छिन्नेति घटावच्छिन्ने खा

कूटस्थो ब्रह्मजीवेशावित्येवं चिच्चतुर्विधा घटाकाशमहाकाशौ जलाकाशाभ्रखे यथा १८
घटावच्छिन्नखे नीरं यत्तत्र प्रतिबिम्बितः साभ्रनक्षत्र आकाशो जलाकाश उदीर्यते १९ म
हाकाशस्य मध्ये यन्मेघमण्डलमीक्ष्यते प्रतिबिम्बतया तत्र मेघाकाशो जले स्थितः २०

काशे यदुदकं स्थितं तज्जले प्रतिबिम्बितोऽभ्रनक्षत्रसहितस्त्वाकाशो जलाकाश इत्युच्यते १९
मेघाकाशं व्युत्पादयति महाकाशस्येति तत्र मेघमण्डले यज्जलं तस्मिन्नित्यर्थः २०

ननु मेघजलस्याप्रतीयमानत्वात्तत्र सत्त्वं कथं प्रतिबिम्बितत्वमित्याशङ्क्याह मेघांशेति मेघस्थस्य
नु जलस्य प्रत्यक्षत्वेनानुपलम्भेऽपि वृष्टिलक्षणकार्येण मेघे तदुपादानमुदकं सूक्ष्मावयवरूपमस्तीत्यनु
मीयते उदकत्वेनैव लिङ्गेन विमलं जलमाकाशप्रतिबिम्बवद्भवितुमर्हतीति जलत्वात् घटगतजल

मेघांशरूपमुदकं तुषाराकारसंस्थितं तत्र खप्रतिबिम्बोऽयं नीरत्वादनु
मीयते २१ अधिष्ठानतया देहद्वयावच्छिन्नचेतनः

वदित्यनुमानेन मेघां
शरूपे जलेऽप्याकाशप्रतिबिम्बसद्भावोऽवगम्यत इत्यर्थः २१ एवं दृष्टान्तभूतमाकाशचतुष्ट
यं व्युत्पाद्य दार्ष्टान्तिके प्रथमोद्दिष्टं कूटस्थं व्युत्पादयति अधिष्ठानेति पञ्चीकृतापञ्चीकृतभूत
कार्यत्वेन स्थूलसूक्ष्मरूपस्य देहद्वयस्य विद्याकल्पितस्याधारतया वर्तमानत्वेन तावन्मात्रावच्छिन्न आत्मा
कूटस्थ इत्युच्यते तत्र कूटस्थशब्दप्रवृत्तौ निमित्तमाह कूटवदिति २२

एवं कूटस्थं व्युत्पाद्य जीवस्य कूटस्थे कल्पितबुद्धिप्रतिबिंबत्वेन तत्स्वरूपातिरिक्तत्वं व्युत्पादयति कूटस्थ इति तस्य जीवशब्दाभिधेयत्वे निमित्तमाह प्राणानामिति कूटस्थातिरिक्तजीवकल्पनम प्रयोजनमित्याशंक्या विकारिणः कूटस्थस्य संसारासंभवात्तन्निर्वाहार्थं सोऽगीकर्तव्य इत्याह संसारेणेति २३ ननु जीवातिरि

कूटवन्निर्विकारेण स्थितः कूटस्थ उच्यते २२ कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्रतिबिंबकः प्राणानां धारणाज्जीवः संसारेण स युज्यते २३ जलव्योम्ना घटाकाशो यथा सर्वस्तिरोहितः तथा जीवेन कूटस्थः सोऽन्योन्याध्यास उच्यते २४ ॥

क्तः कूटस्थोऽस्ति चेत् किमिति न प्रतिभासत इत्याशंक्य जीवेन तिरोहितत्वादिति सदृष्टांतमाह जलेति न त्वेतत्तिरोधानं न क्वापि शास्त्रे प्रतिपादितमित्याशंक्य तस्यान्योन्याध्यासशब्देनाभिधानान्मैवमित्याह सोऽन्योन्याध्यास इति उच्यते भाष्यादिष्विति शेषः २४

ननु द्वयमेवाध्यासश्चेद्द्वयोः कारणरूपाविद्या वक्तव्येत्याशंक्य जीवकूटस्थयोः संसारदशायां भेदाप्रतीतिरेवाविद्येत्याह अयमिति २५ पूर्वोक्तस्य जीवस्याविद्याकल्पितत्वस्य स्पष्टीकरणाय

अयं जीवो न कूटस्थं विविनक्ति कदाचन अनादिरविवेकोऽयं मूलाविद्येति गम्यतां २५ विक्षेपावृतिरूपाभ्यां द्विधाविद्या व्यवस्थिता न भाति नास्ति कूटस्थ इत्यापादनमावृतिः २६

विद्यां विभजते विक्षेपेति विक्षेपहेतुत्वेनाभ्यर्हितत्वाद्दाशतिं प्रथमं लक्षयति न भातीति कूटस्थो न भाति न प्रकाशते नास्ति चेति व्यवहारहेतुरावरणमित्यर्थः २६ न च विद्यायास्तत्कृतावरणस्य च सद्भावे किं प्रमाणमित्याशंक्य लोकानुभव एवेत्याह अज्ञानीति

विदुषा कूटस्थं किं जानासीति पृष्टोऽज्ञानी तं न जानामीत्यज्ञानमनुभूय वक्ति अयमविद्यानुभावः न के
वलमज्ञानानुभवमेव वक्ति अपि तु नास्ति न भाति कूटस्थ इति कूटस्थाभावाभाने चानुभूय वदति अयमाव
रणानुभवः अतउभयत्रानुभवः प्रमाणमिति भावः २७ ननु भवन्मते आत्मनः स्वप्रकाशत्वात्तस्मि
न्नविद्या नोपपद्यते तेजस्तिमिरयोरिव विरुद्धस्वभावत्वेन तयोः संबंधानुपपत्तेरविद्याभावे च तत्कृ

अज्ञानी विदुषा पृष्टः कूटस्थं न प्रबुध्यते न भाति नास्ति कूटस्थ इति बुद्ध्वा वदत्यपि २७
स्वप्रकाशे कुतोऽविद्या तां विना कथमावृतिः इत्यादि तर्कजालानि स्वानुभूतिर्ग्रसत्यसौ
२८

तमावरणं दुर्निरूपं स्यात् तदभावे च तन्मूलकस्य विक्षेपस्यासंभवः विक्षेपाभावे च ज्ञाननिवर्त्यस्यानर्थस्या
भावात् ज्ञानवैयर्थ्यं ततस्तत्प्रतिपादकं शास्त्रमप्रमाणं स्यादित्याशंक्यैतत्सर्वं पूर्वोक्तानुभवबाधि
तमित्याह स्वप्रकाशेति नहि दृष्टेऽनुपपन्नं नामेति न्यायादिति भावः मेति न्यायादिति भावः २८

ननु अनुभवस्योक्ततर्कविरोधेनाभासत्वात्तेन न तत्त्वनिश्चय इत्याशंक्यानुभवप्रामाण्यानभ्युपगमे केवल
तर्कस्यानिश्चायकत्वस्य स्वैरेवाभ्युपगतत्वान्न तार्किकस्य तत्त्वनिश्चयः क्वापि स्यादित्याह स्वानुभूतावि
ति २९ ननु अनुभवस्तत्त्वनिश्चायक एव तथाप्यनुभूयमानस्यार्थस्य संभावितत्वज्ञानाय तर्कोप्यपेक्ष्यते

स्वानुभूतावविश्वासे तर्कस्याप्यनवस्थितेः कथं वा तार्किकंमन्यस्तत्त्वनिश्चयमाप्नुयात् २९
बुद्ध्यारोहाय तर्कश्चेदपेक्ष्येत तथा सति स्वानुभूत्यनुसारेण तर्क्यतां मा कुतर्क्यतां ३० स्वानुभूति
रविद्यायामावृतौ च प्रदर्शिता अतः कूटस्थचैतन्यमविरोधीति तर्क्यतां ३१ नचेद्विरोधिकेनेय
मावृतिर्ह्यनुभूयतां

इत्याशंकानूद्य तर्ह्यनुभवानुसारेणै
व तर्को वर्णनीयो न तद्विरोधेनेत्याह बुद्ध्यारोहायेति ३० कोसावनुभवो यदनुसारेण तर्को वर्णनीय
इत्याशंकायां पूर्वोक्तमविद्यादिगोचरमनुभवं स्मारयति स्वानुभूतिरिति फलितमाह अत इति
३१ तमेव तर्कमभिनीय दर्शयति नचेदिति अविद्यावरणसाधकचैतन्यकचेतनां

स्यैवतद्विरोधित्वेऽविद्याप्रतीतिरेवनस्यादितिभावः तर्ह्यविद्यायाःकोविरोधीत्यतआह विवेकइति विवे
कउपनिषद्विचारजन्यंज्ञानंविवेकस्याविद्याविरोधित्वंक्वदृष्टमित्यतआह तत्वज्ञानिनीति ३२ ए
वमविद्यावरणंदर्शयित्वाविक्षेपाध्यासमाह अविद्येति पूर्वोक्ताविद्यावरणावतिकूटस्थेप्रत्यगात्मन्या

विवेकस्तुविरोध्यस्यास्तत्वज्ञानिनिदृश्यतां ३२ अविद्यावृतकूटस्थेदेहद्वययुताचितिः
शुक्तौरूप्यवदध्यस्ताविक्षेपाध्यासएवहि ३३ इदमंशस्यसत्यत्वंशुक्तिगंरूप्यईक्ष्यते स्व
यंत्वंवस्तुताचैवंविक्षेपेवीक्ष्यतेन्यगं ३४

रोपितस्थूलसूक्ष्मशरीरसहितश्चिदाभासोवि
क्षेपाध्यासइत्यर्थः ३३ अस्यविक्षेपस्याध्यासत्वसिद्धयेशुक्तिरजताध्याससाम्यंदर्शयति इदमंश
स्येति शुक्तिकायांस्थितंपुरोदेशादिसंबंधित्वमबाध्यत्वंचयथाऽरोपितेरजतेऽवभासतेएवंस्वय
त्वंवकूटस्थस्यवस्तुत्वंचकूटस्थनिष्ठमारोपितेचिदाभासेऽवभासतइत्यर्थः ३४

एवंसामान्यांशप्रतीतिमुक्त्वाथयत्प्रकृष्टविशेषाप्रतीतिसाम्यंदर्शयति नीलेति ३५ साम्यांतरंदर्शयति ३५
आरोपितस्येति दृष्टांतेशुक्तिस्थलेआरोपितपदार्थस्यरूप्यनामरूप्यमितिनामयथाएवंकूटस्थेकल्पि
तचिदाभासरूपविक्षेपस्यपूर्वोक्तस्याहमितिनामेत्यर्थः ३६ ननुदृष्टांतेपुरोवर्तिनिशुक्तिसकले इं

नीलपृष्ठत्रिकोणत्वंयथाशुक्तौतिरोहितं असंगानंदताद्येवंकूटस्थेपितिरोहितं ३५ आ
रोपितस्यदृष्टांतेरूप्यंनामयथातथा कूटस्थाध्यस्तविक्षेपनामाहमितिनिश्चयः ३६ इ
दमंशंस्वतःपश्यन्रूप्यमित्यभिमन्यते तथास्वंचस्वतःपश्यन्नहमित्यभिमन्यते ३७

द्रियसन्निकर्षेजातेसतिरूप्यमिदमितितद्भिन्नरजताभिमानउपपद्यतेनैवंदार्ष्टांतिकेआत्मनि
रिक्तवस्त्वभिमानइत्याशंक्यात्रापिस्वप्रकाशतयाचिदात्मन्यवभासमानेतदतिरिक्ताहमित्यभिमानउप
लभ्यतेअलोनवैषम्यमित्यभिप्रायेणाह इदमंशमिति ३७ ननुस्वयमहंशब्दयोरेकार्थत्वात्कथंदृष्टां

तद्दर्शितिकयोः साम्यमित्याशंक्येदंरूप्यशब्दार्थयोः स्वयमहंशब्दार्थयोश्च सामान्यविशेषरूपत्वस्यो चित्रदी॰
पंचद॰ भयत्रसाम्यान्मैवमित्याह इदंत्वरूप्यतेइति ३८ स्वयंशब्दार्थस्यसामान्यरूपत्वंस्पष्टीकर्तुंलौकिकप्रयोगं
१ तावद्दर्शयति देवदत्तइति ३९ नचत्वयंप्रयोगःलोकेकथमेतावतास्वयंशब्दार्थस्यसामान्यरूपत्वमि
त्याशंक्येदंशब्दवदित्याह इदंरूप्यमिति यथारूप्यवस्त्रादौसर्वत्रेदंशब्दस्यप्रयुज्यमानत्वान्नदंर्थ

इदंत्वरूप्यतेभिन्नेस्वत्वाहंतेतथेष्यतां सामान्यंचविशेषश्चउभयत्रापिगम्यते ३८ देवदत्तः
स्वयंगच्छेत्त्वंवीक्षस्वस्वयंतथा अहंस्वयंनशक्नोमीत्येवंलोकेप्रयुज्यते ३९ इदंरूप्यमि
दंवस्त्रमितियद्वदिदंतथा असौत्वमहमित्येषुस्वयमित्यभिमन्यते ४० अहंत्वाद्भिद्यते
स्वत्वंकूटस्थेतेनकिंतव स्वयंशब्दार्थएवैषकूटस्थइतिमेभवेत् ४१

स्यसामान्यरूपत्वंतथाअसौत्वमहमित्यादौसर्वत्रस्वयंशब्दप्रयोगात्तदर्थस्यापिसामान्यरूपत्वम राम॰
वगम्यतइत्यर्थः ४० ननुस्वयमहंशब्दार्थयोर्लोकेभेदेएतावताकूटस्थात्मनिकिमायातमि ८
तिपृच्छति अहंत्वादिति सामान्यरूपःस्वयंशब्दार्थएवकूटस्थइतीदमायातमित्याह स्वयंशब्दार्थइति
४१

ननुस्वत्वरूपोधर्मोऽन्यत्वंनिवारयतिनकूटस्थत्वंबोधयतीतिशंकते अन्यत्ववारकमिति स्वयंशब्दार्थस्यकू
टस्थस्यैवात्मत्वाङ्गत्वेनान्यवारणमिष्टमेवेतिपरिहरति अन्यवारणंकूटस्थस्येति ४२ ननुस्वयमात्मशब्दयोर्भि
न्नप्रवृत्तिनिमित्तयोर्गवाश्वादिशब्दयोरिव कार्यत्वाभावात्कथंस्वयंशब्दार्थस्यकूटस्थस्यात्मत्वमित्याशंक्यह
स्तकरादिशब्दवदेकार्थत्वोपपत्तेर्मैवमितिपरिहरति स्वयमात्मेतीति पर्यायत्वेसहप्रयोगाभावेहेतुमाह

अन्यत्ववारकंस्वत्वमितिचेदन्यवारणं कूटस्थस्यात्मतांवक्तुरिष्टमेवहितद्भवेत् ४२ स्वयमात्मे
तिपर्यायौतेनलोकेतयोःसह प्रयोगोनास्त्यतःस्वत्वमात्मत्वंचान्यवारकं ४३ घटःस्वयंनजा
नातीत्येवंस्वत्वंघटादिषु अचेतनेषुदृष्टंचेदृश्यतामात्मसत्त्वतः ४४

तेनलोकेइति फलितमाह अतःस्वत्वमिति ४३ ननुघटादिष्वचेतनेष्वपिस्वयंशब्दस्यप्रयोगदर्शनात्स्व
यंत्वात्मत्वयोरेकत्वंनघटतइतिशंकते घटइति घटादिष्वपिस्फुरणरूपेणात्मचेतनस्यसत्त्वात्तेष्वपि
स्वयंशब्दप्रयोगोनविरुध्यतइत्याह दृश्यतामिति ४४

ननुघटादिष्वप्यात्मचैतन्यस्यसत्वेचेतनाचेतनविभागोनिर्निमित्तकःस्यादित्याशंक्यचेतनाचेतनविभागस्यचि चित्रदी॰
पंचदशी॰ दाभाससत्वासत्वलक्षणकारणंसद्भावान्नैवमितिपरिहरति चेतनेति ४५ ननुचेतनाचेतनविभागस्यचि
१ दाभाससत्वासत्वप्रयुक्तत्वाभ्युपगमेचेतनेष्वात्मसत्वाभ्युपगमोनिष्प्रयोजनःस्यादित्याशंक्यचेतनाचेत

चेतनाचेतनभिदाकूटस्थात्मकृतानहि किंतुबुद्धिकृताभासकृतैवेत्यवगम्यतां ४५ यथाचे
तनआभासःकूटस्थेभ्रांतिकल्पितः अचेतनोघटादिश्चतथातत्रैवकल्पितः ४६ तत्तेदंतेयो
हस्वत्वमित्वमहमादिषु सर्वत्रानुगतेतेनतयोरप्यात्मतेतिचेत् ४७

नाचेतनविभागहेतुत्वेनकूटस्थस्यानभ्युपगमत्वेप्यचेतनकल्पनाधिष्ठानत्वेनकूटस्थोभ्युपगंतव्यइ
त्यभिप्रायेणघटादेस्तत्रकल्पितत्वंसदृष्टांतमाह यथाचेतनइति ४६ स्वत्वात्मत्वयोरेकत्वेऽतिप्रसं राम॰
गंशंकते तत्तेदंतेअपीति त्वमहमादिषुसर्वत्रानुगतस्यस्वत्वस्येवसर्वत्रानुगतयोस्तत्तेदंतयोरप्या ९
त्मस्वरूपताकिंनस्यादितिभावः ४७

तत्तेदंतयोरात्मत्वाधिकरणत्वादात्मत्वंनसंभवतीत्याह तेआत्मत्वेपीति तत्तेदंतेस्वत्वमिवयद्यप्यत्वम
हमादिष्वनुगतेतथापितेष्वनुवर्तमानेप्यात्मत्वेप्यनुगतेनतदात्मत्वमिदमात्मत्वमित्यादिव्यवहारसंभवादत
स्तयोरात्मत्वाधिकरणत्वादात्मत्वरूपतानसंभाव्यते तत्रदृष्टांत सम्यक्त्वादेरिति आसत्वंसम्यगात्म
त्वंअसम्यगितिव्यवहारवदात्मत्वेप्यनुवर्तमानयोःसम्यक्त्वासम्यक्त्वयोरिवेत्यर्थः ४८ एवंप्रा

ते आत्मत्वेप्यनुगतेतत्तेदंतेततस्तयोः आत्मत्वंनैवसंभाव्यंसम्यक्त्वादेर्यथातथा ४८ तत्ते
दंतेस्वतान्यत्वेत्वंताहंतेपरस्परं प्रतिद्वंद्वितयालोकेप्रसिद्धेनास्तिसंशयः ४९

संगिकंपरिसमाप्यफलितप्रदर्शनायलोकव्यवहारसिद्धमर्थमनुवदति तत्तेदंतेइति तत्ताप्रतियोगि
त्वमिदंतयास्तद्विदमितिस्वत्वप्रतियोगित्वमन्यत्वस्यस्वयमन्यइतित्वंताप्रतियोगित्वमहंतायास्त्वमह
मितिलोकेप्रसिद्धंप्रतिद्वंद्वित्वेनप्रयोगदर्शनात्प्रसिद्धमितिभावः ४९

नन्वस्त्वेवंलोके प्रवृत्तेः किमायातमित्यत आह असंगतायामिति असंगत्वप्रतियोगिस्वयंग्राह्यार्थसंगताप्रतियोग्य
हंशब्दार्थोविद्याभासः कूटस्थे कल्पित इत्यर्थः ५० ननूक्तप्रकारेण जीवकूटस्थयोर्भेदे सत्यपि सर्वैरयं
किमितिनजानंतीत्याशंक्याह अहंतेति बुद्धिसाक्षिणः कूटस्थस्य स्वबुद्ध्याप्रतीतौ कर्तुमशक्यत्वादहमि

असंगतायाः प्रतिद्वंद्वी स्वयंकूटस्थ इष्यतां असंगतायाः प्रतियोग्येषोऽहमित्यात्मनि कल्पितः ५० अ
हंतास्वत्वयोर्भेदे रूप्यतेदंतयोरिव स्पष्टेपि मोहमापन्ना एकत्वं प्रतिपेदिरे ५१ तादात्म्या
ध्यास एवात्र पूर्वोक्ताविद्यया कृतः अविद्यायां निवृत्तायां तत्कार्यं विनिवर्तते ५२

नि प्रतिभासमानयोर्जीवकूटस्थयोर्भ्रांत्यैकत्वं प्रतिपन्ना इत्यर्थः ५१ नन्वस्य जीवकूटस्थयोरेक राम०
त्वभ्रमस्य किंकारणमितित्यपेक्षायामाह तादात्म्येति अत्रास्मिन्ग्रंथेऽनादिरविवेकोयमित्यनेनो १०
क्तयाऽविद्ययेत्यर्थः ततोऽविद्याकार्यत्वमस्यातोऽविद्यानिवर्तकज्ञानेनैवतन्निवृत्तिरित्याह अविद्यायामिति
५२

नत्वध्यासस्याविद्याकार्यत्वात्तन्निवृत्त्यानिवृत्तिरित्येतदनुपपन्नं ब्रह्मात्मैकत्वविद्यायामुत्पन्नाया
मप्यविद्याकार्यस्य देहादेरुपलभ्यमानत्वादित्यत आह अविद्यावृतीति अविद्यैककारणयोरावृतितादा
त्म्ययोर्विद्ययैव विनिवृत्तिः कर्मसहिताऽविद्याजन्यस्य तु विक्षेपस्वरूपस्य कर्मावसानपर्यंतमवस्थान

अविद्यावृतितादात्म्ये विद्ययैव विनश्यतः विक्षेपस्य स्वरूपं तु प्रारब्धक्षयमीक्षते ५३
उपादाने विनष्टेपि क्षणं कार्यं प्रतीक्षते इत्याहुस्तार्किकास्तद्वदस्माकं किं न संभवेत् ५४

मित्यविरोध इतिभावः ५३ ननु प्रारब्धकर्मणो निमित्तमात्रत्वात्तस्य सत्त्वमात्रेणोपादा
नेविनष्टेपि कथं कार्यानुवृत्तिरित्याशंक्य शास्त्रांतरसिद्धदृष्टांतेन तदनुवृत्तिं संभावयति उपादा
न इति ५४

पंचदशी । ननु तार्किकैः कार्यस्य क्षणमात्रमवस्थानमंगीकृतं न चिरकालमित्याशंक्याह तंतूनामिति सं चित्रदी ।
१ सारस्यानादिकालमारभ्यानुवृत्तत्वात्संस्कारवशेन कुलालचक्रभ्रमवच्चिरकालानुवृत्ति
र्न विरुध्यत इति भावः ५५ ननु तार्किकैः कार्यस्याऽयुक्तमालिंगितं तद्वदुवतीपोत्याशंक्याखो

तंतूनां दिनसंख्यानां तैस्तादृक्कारणईसितः भ्रमस्यासंख्यकल्पस्य योग्यः कारणइ
हेष्यतां ५५ विनाक्षोदक्षमं मानं तैर्वृथा परिकल्प्यते श्रुतियुक्त्यनुभूतिभ्यो वदतां किं नु
दुःशकं ५६

क्षोदक्षमं दर्शयति विनेति क्षोदक्षमं विचारसहं मानं विना प्रमाणमंतरेणेत्यर्थः राम ।
५६ तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये इति श्रुतिश्चक्रभ्रमादिदृष्टांतो युक्तिरनु ११
भूतिर्विद्वदनुभवः एतेभ्यः प्रमाणेभ्यः किं वक्तुमशक्यमित्यभिप्रायः प्रकृतमनुसरति ॐ

आस्तामिति स्वयमहंशब्दार्थयोः कूटस्थपरिणामिनोरेकत्वं भ्रांत्या सिद्धं ५७ ननु कूटस्थजीवयोरेकं
त्वं भ्रांतिसिद्धं चेदिदं भ्रांतमिति केऽपि कुतो न जानंतीत्याशंक्य श्रुतितात्पर्यालोचनशून्यत्वादित्याह भ्रां
म्यंत इति ५८ ननु श्रुत्यर्थप्रवक्तारोऽपि केचिदित्यं कुतो न जानंतीत्याशंक्य तेषां साकल्येन श्रुत्य

आस्तां दुस्तार्किकैः साकं विवादः प्रकृतं ब्रुवे स्याज्ञमोः सिद्धमेकत्वं कूटस्थपरिणामिनोः ५७
भ्राम्यंते पंडितंमन्याः सर्वे लौकिकतीर्थिकाः अनादृत्य श्रुतिं मौर्ख्यात्केवलां युक्तिमाश्रिताः
५८ पूर्वापरपरामर्शविकलास्तत्र केचन वाक्याभासान्स्वस्वपक्षे योजयंत्यप्यलज्जया ५९
कूटस्थादिशरीरांतसंघातस्यात्मतां जगुः लोकायताः पामराश्च प्रत्यक्षाभासमाश्रिताः ६०

र्थपर्यालोचनाभावादित्याह पूर्वापरेति ५९ तत्र तावत्प्रत्यक्षैकप्रमाणाभ्युपगमे नातिस्थूलत्वा
ल्लोकायतादिपक्षं प्रथमतोऽनुभाषते कूटस्थादिति प्रत्यक्षसिद्धत्वेन देहादेरात्मत्वं पारमार्थिकं स्यादित्या

ॐ श्रीगणेशाय नमः

ते प्रत्यक्षैकप्रमाणवादिनोपि परमव्यामोहनाय स्वमतं श्रुतिसिद्धमिति दर्शयितुं वाक्यमप्युदाहरंतीत्या

ह श्रौतीकर्तुमिति कोशमन्नमयमिति शब्देनान्नमयकोशप्रतिपादकं स वा एष पुरुषोन्नरसमय

: इत्यादिवाक्यं लक्ष्यते विरोचनस्य सिद्धांतमिति तत्सिद्धांतप्रतिपादकमात्मैवेह महय्य इत्यादि

श्रौतीकर्तुं स्वपक्षं ते कोशमन्नमयं तथा विरोचनस्य सिद्धांतं प्रमाणं प्रतिजज्ञिरे ६१ जीवा

त्मनिर्गमे देहमरणस्यात्र दर्शनात् देहातिरिक्त एवात्मेत्याहुर्लौकायताः परे ६२

वाक्यं लक्ष्यते एतद्वाक्यद्वयं प्रमाणत्वेन प्रतिजानंत एव न तूपपादयितुं क्षमाः प्रकरणविरो

धादिति भावः ६१ अस्मिन्मते दोषप्रदर्शनपुरःसरं मतांतरमुत्थापयति जीवात्मेति ६२ कीदृशो

देहातिरिक्त आत्मा केन वा प्रमाणेनावगम्यत इत्याशंकामाह छ

प्रत्यक्षत्वेनेति अहं वच्मि अहं पश्यामीत्यादिप्रयोगदर्शनाद्देहातिरिक्ताहंबुद्धिगम्यानींद्रियाण्यात्मेत्य

र्थः ६३ नन्विंद्रियाणामचेतनानां कथमात्मत्वमित्याशंक्य श्रुतिष्विंद्रियसंवादश्रवणाच्चेतनत्वम

प्रत्यक्षत्वेनाभिमताऽहंधीर्देहातिरेकिणं गमयेदिंद्रियात्मानं वच्मीत्यादिप्रयोगतः ६३

वागादीनामिंद्रियाणां कलहः श्रुतिषु श्रुतः तेन चैतन्यमेतेषामात्मत्वं तत एव हि

६४ हैरण्यगर्भाः प्राणात्मवादिनस्त्वेवमूचिरे चक्षुराद्यक्षलोपेपि प्राणसत्त्वे तु जीवति

६५

सिद्धमित्याह वागादीनामिति चेतनत्वस्यैवात्मलक्षणत्वाच्चेतनानामिंद्रियाणामात्मत्वमुचि

तमित्याह आत्मत्वमिति ६४ मतांतरमुत्थापयति हैरण्यगर्भा इति ६५ प्राणस्यात्मत्वे श्रौ

तलिंगानि दर्शयति छ

प्राण इति प्राणादय एतस्मिन्पुरे जाग्रतीत्यादिना प्राणजागरणं श्रूयते तेन प्राणस्य पंचत उद्वेति एतदु कथमन्ये वनदेत ड कथमिति प्राणस्य श्रेष्ठ्यादिकं श्रूयते अन्योंतर आत्मा प्राणमय इत्यादिना प्राणमयकोशः प्रपंचितः आदिशब्देन प्राणसंवादप्रवेशादिकं ग्राह्यं ६६ प्राणस्यांतरस्य मनस आ-

प्राणो जागर्ति सुप्तेपि प्राणश्रैष्ठ्यादिकं श्रुतं कोशः प्राणमयः सम्यक् विस्तरेण प्रपंचितः ६६ मन आत्मेति मन्यंत उपासनपरा जनाः प्राणस्याभोक्तृता स्पष्टा भोक्तृत्वं मनसस्ततः ६७ मन एव मनुष्याणां कारणं बंधमोक्षयोः श्रुतो मनोमयः कोशस्तेनात्मेतीरितं मनः ६८

त्मत्ववादिनो मतं दर्शयति मन आत्मेतीति प्राणस्यानात्मत्वे युक्तिमाह प्राणस्येति ६७ मनस आत्मत्वे युक्तिप्रतिपादिकां श्रुतिमाह मन एवेति तस्माद्वा एतस्मात्प्राणमयादन्योंतर आत्मा मनोमय इति श्रुत्यंतरं दर्शयति श्रुत इति फलितमाह तेनेति ६८

मनसोप्यंतरस्य विज्ञानस्यात्मत्ववादिनो बौधस्य मतं दर्शयति विज्ञानमिति विज्ञानस्यांतरत्वे युक्तिमाह यत इति ६९ विज्ञानमनःशब्दवाच्यस्यांतःकरणस्यैकत्वात्कथं मनोविज्ञानयोः कार्यकारणभाव इत्याशंक्य तमुपपादयितुं तयोर्भेदं तावद्दर्शयति अहंवृत्तिरिति ७० तयोः कार्यकारणभावमाह

विज्ञानमात्मेति परे आहुः क्षणिकवादिनः यतो विज्ञानमूलत्वं मनसो गम्यते स्फुटं ६९ अहंवृत्तिरिदंवृत्तिरित्यंतःकरणं द्विधा विज्ञानं स्यादहंवृत्तिरिदंवृत्तिर्मनो भवेत् ७० अहंप्रत्ययबीजत्वमिदंवृत्तेरिति स्फुटं अविदित्वा स्वमात्मानं बाह्यं वेत्ति न तु क्वचित् ७१ क्षणे क्षणे जन्मनाशावहंवृत्तेर्मितो यतः विज्ञानं क्षणिकं तेन स्वप्रकाशं स्वतो मिते ७२

अहंप्रत्ययबीजत्वमिति तदेवोपपादयति अविदित्वेति अहंवृत्त्युदयाभावे इदंवृत्त्यनुदयादनयोः कार्यकारणभाव इत्यर्थः पुनस्तस्य विज्ञानस्य क्षणिकत्वेऽनुभवं प्रमाणयति क्षणे क्षण इति क्षणिकत्वमुपपाद्य स्वप्रकाशत्वमुपपादयति स्वप्रकाशमिति स्वेनैव प्रमितत्वादित्यर्थः ७२

विज्ञानस्यात्मत्वे आगमः प्रमाणमित्याह विज्ञानमयेति तस्माद्वा एतस्मान्मनोमयादन्योंतर आत्मा वि
ज्ञानमयः विज्ञानं यज्ञं तनुते इत्यादिवाक्यं विज्ञानस्यात्मत्वप्रतिपादकमिति भावः ७३ बौद्धांतर
भेदस्य शून्यवादिनो मतं दर्शयति विज्ञानमिति ७४ तत्र श्रुतिमाह असदेवेदमितीति शून्यः

विज्ञानमयकोशोयं जीव इत्यागमा जगुः। सर्वः संसार एतस्य जन्मनाशसुखादिकः ७३
विज्ञानं क्षणिकं नात्मा विद्युदभ्रनिमेषवत्। अन्यस्यानुपलब्धत्वाच्छून्यं माध्यमिका जगुः। ७
४ असदेवेदमित्यादाविदमेव श्रुतं ततः। ज्ञानज्ञेयात्मकं सर्वं जगद्भ्रांतिप्रकल्पितं ७५ निर
धिष्ठानविभ्रांतेरभावादात्मनोस्तिता। शून्यस्यापि ससाक्षित्वादन्यथा नोक्तिरस्य ते ७६

स्यैवतद्रूपत्वे प्रतीयमानस्य जगतः का गतिरित्यत आह ज्ञानेति ७५ तदेतन्मतं दूषयति निरधिष्ठाने
ति निःस्वरूपस्य शून्यस्याधिष्ठानत्वायोगान्निरधिष्ठानस्य भ्रमस्यानुपपत्तेर्जगत्कल्पनाधिष्ठानस्या
त्मनः सत्ताभ्युपगंतव्या किंच शून्यवादिनोपि शून्यसाक्षित्वेनावश्यमात्माभ्युपगंतव्यः अन्यथा तस्या
नभ्युपगमे शून्यस्योक्तिः शून्यमिति विज्ञानं तेबोधास्य च न तव मतेन सिध्येदिति भावः ७६

कस्तर्ह्यात्मेत्यत आह अन्य इति तस्माद्वा एतस्माद्विज्ञानमयादन्योंतर आत्मानंदमयः अस्तीत्येवोपलब्ध
व्यस्तत्वभावेनेति च श्रुतिसद्भावादानंदमय आत्माभ्युपगंतव्य इति वैदिकदर्शनं वैदिकसिद्धांतः ७७ ए
वमात्मस्वरूपे विप्रतिपत्तिं प्रदर्श्य तत्परिमाणेपि वादिविप्रतिपत्तिं दर्शयति अणुरिति ७८ तत्राणुत्ववादि

अन्यो विज्ञानमयत आनंदमय आंतरः। अस्तीत्येवोपलब्धव्य इति वैदिकदर्शनं ७७ अणुर्महा
न्मध्यमो वेत्येवं तत्रापि वादिनः। बहुधा विवदंते हि श्रुतियुक्तिसमाश्रयात् ७८ अणुं वदंत्यांतरा
णाः सूक्ष्मनाडिप्रचारतः। रोम्णः सहस्रभागेन तुल्यासु प्रचरत्ययं ७९ अणोरणीयानेषोणुः सू
क्ष्मात्सूक्ष्मतरं त्विति। अणुत्वमाहुः श्रुतयः शतशोथ सहस्रशः ८०

नस्तावद्दर्शयति अण्विति अ
णुत्वाभिधाने हेतुमाह सूक्ष्मेति तदुपपादयति रोम्ण इति नाडीविशेषः सूक्ष्मासु नाडीषु संचारोणुत्व
मंतरेण न घटत इत्यभिप्रायः ७९ अणुत्वे किं प्रमाणमित्यत आह अणोरिति अणोरणीयान्महतो
महीयानेषोणुरात्मा चेतसा वेदितव्यः सूक्ष्मात्सूक्ष्मतरं नित्यमित्यादिश्रुतयाः इत्यर्थः ८०

अत्यंतरमुदाहरति बालाग्रेति ८१ मध्यमपरिमाणवादिनो मतं दर्शयति दिगंबरा इति तत्रोपपत्तिमाह आपा
देति स एष इह प्रविष्ट आनखाग्रेभ्य इति श्रुतिरप्यत्र प्रमाणमित्याह आनखाग्रेति ८२ ननु मध्यमपरिमाण
त्वेऽतिसूक्ष्मनाडीप्रचारो न घटत इत्याशंक्याह सूक्ष्मनाडीति यथा देहावयवयोर्हस्तयोः कंचुकप्रवेशेन देह

बालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेय इति चाह परा श्रुतिः ८१ दिगंब
रा मध्यमत्वमाहुरापादमस्तकं चैतन्यव्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि ८२ सूक्ष्मनाडिप्रचा
रस्तु सूक्ष्मैरवयवैर्भवेत् स्थूलदेहस्य हस्ताभ्यां कंचुकप्रतिमोकवत् ८३ न्यूनाधिकशरीरे
षु प्रवेशोऽपि गमागमैः आत्मांशानां भवेत्तेन मध्यमत्वं विनिश्चितम् ८४

स्य कंचुकप्रवेशस्तद्वदात्मावयवानां सूक्ष्मा
णां नाडीषु प्रचारेणात्मनोऽपि प्रचार उपपद्यत इत्यर्थः ८३ न चात्मनो नियतमध्यमपरिमाणत्वे कर्म
वशान्न्यूनाधिकशरीरप्रवेशो न घटत इत्याशंक्यावयवागमापायाभ्यामात्मनो नियतमध्यमपरि
माणत्वाद्देहवैपुल्यं न विरुध्यत इत्याह न्यूनाधिकेति फलितमाह तेनेति ८४

आत्मनः सावयवत्वे घटादिवदनित्यत्वप्रसंगेन तन्मतं दूषयति सांशस्येति भवतु को दोषस्तत्राह तथा
सतीति कृतयोः पुण्यपापयोर्भोगमंतरेण नाशः अकृतयोरकस्मात्फलदातृत्वं अकृताभ्यागमः ए
तद्दोषद्वयमात्मनोऽनित्यत्वाभ्युपगमे भवेदिति भावः ८५ अतः पारिशेष्यादात्मनो विभुत्वं सिद्धमि

सांशस्य घटवन्नाशो भवत्येव तथा सति कृतनाशाकृताभ्यागमयोः को वारको भवेत् ८५
तस्मादात्मा महानेव नैवाणुर्नापि मध्यमः आकाशवत्सर्वगतो निरंशः श्रुतिसंमतः
८६ इत्युक्त्वा तद्विशेषे तु बहुधा कलहं ययुः अचिद्रूपोऽथ चिद्रूपश्चिदचिद्रूप इत्यपि ८७

त्याह तस्मादिति तत्र प्रमाणमाह आकाशवदिति आकाशवत्सर्वगतश्च नित्यः निष्कलं निष्क्रियमित्या
द्यागमः प्रमाणमित्यर्थः ८६ एवमात्मनो विभुत्वं प्रसाध्य तस्य चिद्रूपत्वं निश्चेतुं तावद्वादिविप्रतिपत्तिं दर्श
यति इत्युक्त्वेति ८७ अचिद्रूपत्ववादिनो दर्शयति प्राभाकरा इति तत्प्रक्रियामनुभाषते अका

पंचदशी शावत्वद्रव्यमिति आत्मा उत्कंन विभुमर्हति गुणवत्वात् आकाशवदित्यनुमानं सूचितं आत्मनः पृथिव्यादिभ्यो चित्रदी०

भेदं साधकं विशेषगुणं दर्शयति शब्दवदिति आत्मा पृथिव्यादिभ्यो भिद्यते ज्ञानगुणकत्वात् यस्तु पृथिव्यादि

९ भ्यो न भिद्यते तत् ज्ञानगुणकमपि न भवति यथा पृथिव्यादीत्यनुमानं द्रष्टव्यं ८८ तस्यैव विशेषगु

णांतराण्याह इच्छेति तत्संस्काराः भावनाः ८७ एषां गुणानामुत्पत्तिविनाशकारणमाह आत्म

घटाकारात्तार्किकाश्च शङ्कुरस्याचिदात्मतां आकाशवद्द्रव्यमात्माशब्दवत्तद्गुणश्चिति

८८ इच्छाद्वेषप्रयत्नाश्च धर्माधर्मौ सुखासुखे तत्संस्काराश्च तस्यैते गुणाश्चितिवदीरिताः

८९ आत्मनो मनसा योगे स्वादृष्टवशतो गुणाः जायंतेऽथ प्रलीयंते सुषुप्तेऽदृष्टसंक्षया

त् ९० चितिमत्वाच्चेतनोयमिच्छाद्वेषप्रयत्नवान् स्याद्धर्माधर्मयोः कर्त्ता भोक्ता दुःखा राम०

दिमांस्तथा ९१

नइति स्वादृष्टवशात् आत्मनो मनसा योग इत्यन्वयः ९० आत्मनोऽचिद्रूपत्वे १६

कथं चेतनत्वास्युपगम इत्याशंक्य चितिमत्वादित्याह चितिमत्वादिति आत्मनश्चेतनत्वे हेत्वंत

रमाह इच्छेति तस्येश्वराद्भेदलक्षणमाह स्यादिति ९१

नत्वात्मनो विभुत्वे लोकांतरगमनादिकं कथं घटेतेत्याशंक्यास्मिन्देहे कर्मवशादिच्छाद्युत्पत्तौ सत्याम

प्यात्मनोऽवस्थानादिव्यवहार इव कर्मवशाल्लोकांतरे देहांतरोत्पत्तौ तद्वच्छिन्नात्मप्रदेशे सुखाद्युत्प

त्तिवशात्तत्रात्मनो गमनादिव्यवहार इत्यौपचारिकमात्मनो गमनादिकमित्यभिप्रेत्याह

ह यथात्र कर्मवशात् इति ९२ आत्मनः कर्तृत्वादिधर्मवत्वे किं प्रमाणमित्यत आह कर्मकां

यथात्र कर्मवशात् कादाचित्कं सुखादिकं तथा लोकांतरे देहे कर्मणेच्छादिजन्यते ९२

एवं च सर्वगस्यापि संभवेतां गमागमौ कर्मकांडः समग्रोत्र प्रमाणमिति तेऽवदन् ९३

आनंदमयकोशो यः सुषुप्तौ परिशिष्यते अस्पष्टचित्स आत्मैषां पूर्वकोशोऽस्य ते गुणाः

९४ चित्रदीप

इति ९३ नचान्योविशेषो ज्ञानमयतस्त्वानंदमयस्यांतर इत्यत्रानंदमयस्यात्मत्वमुक्तमिदानीमिच्छादीनां

नन्यः प्रतिपाद्यतेऽतः पूर्वोत्तरविरोध इत्याशंक्याह आनंदमयेति सुषुप्तावस्पष्टचिदानंदमयः कोशः परि

शिष्यते स पूर्वकोशः श्रोतेषु पंचकोशेषु प्रथम एषां शास्त्राकारादीनामात्माऽस्यात्मनस्ते पूर्वोक्ता ज्ञानादयो गुणा

 अस्यैवात्मनश्चिदचिद्रूपत्वं भाट्टा वर्णयंतीत्याह गूढमिति भाट्टा आत्मनो गूढमस्पष्टं चैतन्यमुत्प्रेक्ष्य कल्पयित्वा चि
च्चैव जडोभयात्मकतां वर्णयंति चैतन्योत्प्रेक्षायां कारणमाह चिदुत्प्रेक्षेति उत्थितस्य स्मृतेश्चिदुत्प्रेक्षा भवतीति
योजना सुषुप्तेरुत्थितस्य जायमानायाः स्मरणात् सुषुप्ते चैतन्यस्योत्प्रेक्षा भवतीत्यर्थः ॥ ५५ चिदुत्प्रेक्षाप्रका

गूढं चैतन्यमुत्प्रेक्ष्य जडबोधस्वरूपतां आत्मनो ब्रुवते भाट्टा
श्चिदुत्प्रेक्षोत्थितः स्मृतेः ॥ ५५ ॥ जडो भूत्वा तदास्वाप्समिति जाड्य
स्मृतिस्तदा विना जाड्यानुभूतिं न कथंचिदुपपद्यते ॥ ५६ ॥

रमेव स्पष्टयति जडो भूत्वेति तदा सुषुप्ती
काले जाड्यानुभवमंतरेण जडो भूत्वास्वाप्समित्येवं रूपा जाड्यस्मृतिरुत्थितस्य पुरुषस्य जायमा
ना सुषुप्तिकालीनजाड्यानुभवमंतरेणानुपपद्यमाना तदानीतनजाड्यानुभवं कल्पयतीति भावः
॥ ५६ ॥

सुषुप्तौ चैतन्यलोपाभावे प्रमाणमाह द्रष्टुरिति नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वादिति श्रु
तौ द्रष्टुरात्मनः स्वरूपभूताया दृष्टेर्लोपो न विद्यते विनाशरहितस्वभावत्वात् अन्यथा लोपवादिनोपि
निःसाक्षिकत्वबुभुक्षराभावत्वात् सुषुप्तौ चैतन्यलोपाभावः श्रूयते तत्तलोपिकारणद्वयमात्मा खद्योतवद्

द्रष्टुर्दृष्टेरलोपश्च श्रुतः सुप्तौ ततस्त्वयं अप्रकाशप्रकाशाभ्यामात्मा खद्योतवद्युतः ॥ ५७ ॥ नि
रंशस्योभयात्मत्वं न कथंचिद्घटिष्यते तेन चिद्रूप एवात्मेत्याहुः सांख्यविवेकिनः ॥ ५८ ॥ जा
ड्यांशः प्रकृते रूपं विकारि त्रिगुणं च तत् चितो भोगापवर्गार्थं प्रकृतिः सा प्रवर्तते ॥ ५९ ॥

स्फुरणास्फुरणाभ्यां युक्तो भवतीत्यर्थः अस्मिन्भाट्टमते दूषणाभिधानपुरःसरं सांख्यमतमुत्थापयति निरं
शस्येति जाड्यस्य तर्हि का गतिरित्याशंक्याह जाड्यांश इति तत्प्रकृतिरूपं सत्त्वरजस्तमोगुणात्मकं प्र
कृतिकल्पनायां प्रयोजनमाह चित इति चितः पुरुषस्येति यावत् ॥ ५९ ॥

पंचदशी० ननु चितोऽसंगत्वेन प्रकृतिपुरुषयोरत्यंतविविक्तत्वात्प्रकृतिप्रवृत्त्या कथं पुरुषस्य भोगापवर्गाविद्याशंक्य तयोर्वि चित्रदी०
वेकस्याग्रहणात्पुरुषे भोगापवर्गौ क्रियेते इत्याह असंगाया इति तार्किकादिभिरिव सांख्यैरात्मभेदोंगीक्रियत इ
त्याह बंधमुक्तीति १०० प्रकृतिसद्भावे पुरुषस्यासंगत्वे च श्रुतिमुदाहरति महत इति १ एवं जी

असंगायाश्चितेर्बंधमोक्षौ भेदाग्रहान्मतौ बंधमुक्तिव्यवस्थार्थं पूर्वेषामिव चिद्भिदा १००
महतः परमव्यक्तमिति प्रकृतिरुच्यते श्रुतावसंगता तद्वदसंगो हीत्यतः स्फुटा १०१ चित्सं
निधौ प्रवृत्तायाः प्रकृतेर्हि नियामकं ईश्वरं ब्रुवते योगाः स जीवेभ्यः परः श्रुतः १०२

वविषयां वादिविप्रतिपत्तिं प्रदर्श्य ईश्वरविषयां तां प्रदर्शयितुमीश्वरस्वरूपं तावदुपपादयति चित्सन्नि राम०
धाविति २ ननु प्रकृतिपुरुषातिरिक्तेश्वरकल्पने न प्रमाणमित्याशंक्याह स जीवेभ्य इति २ ३ १९

तामेवेश्वरसद्भावप्रतिपादिकां श्रुतिं पठति प्रधानेति प्रधानं गुणसाम्यावस्थारूपं क्षेत्रज्ञा जीवास्ते
षां पतिः गुणाः सत्वादयस्तेषामीशो नियामक इत्यर्थः न केवलमियमेव श्रुतिरीश्वरप्रतिपादि
का अंतर्यामिब्राह्मणमप्यस्तीत्याह आरण्यक इति ३ तामेव वादिविप्रतिपत्तिं प्रतिजानीते अत्रा

प्रधानक्षेत्रज्ञपतिर्गुणेश इति हि श्रुतिः आरण्यके संभ्रमेण ह्यंतर्याम्युपपादितः ३
अत्रापि कलहायंते वादिनः स्वस्वयुक्तिभिः वाक्यान्यपि यथाप्रज्ञं दार्ढ्यायोदाहरंति
हि ४

पातिपत्तिमनतिक्रम्य यथाप्रज्ञं दार्ढ्यायोदाहरंति पातंजलिनोक्तमीश्वरप्रतिपादकं क्लेशकर्मविपाकाश
यैरपरामृष्टः पुरुषविशेष ईश्वर इत्येतं सूत्रमर्थतः पठति

पंचदशी० क्लेशेति क्लेशास्त्वविद्यादयः अविद्यास्मितारागद्वेषाभिनिवेशाः पंच कर्माणि कर्माशुक्लकृष्णयोगि चित्रदी०
नस्त्रिविधमितरेषामिति निषिद्धविहितानि सतिमूले तद्विपाको जात्यायुर्भोगा इत्युक्ताः कर्मविपाकाः फ
१ विशेषास्तादृशा यास्तेषां संस्कारा आशयास्तैः क्लेशादिभिरसंस्पृष्टः पुरुषविशेष ईश्वरो भवतीति सो

क्लेशकर्मविपाकैस्तदाशयैरप्यसंयुतः । पुंविशेषो भवेदीशो जीववत्सोप्यसंगचित् ५
तथापि पुंविशेषत्वाद्घटतेस्य नियंतृता । अव्यवस्थौ बंधमोक्षावापतेतामिहान्यथा ६
जीवास्मादित्येवमादावसंगस्य परात्मनः । श्रुतं तद्युक्तमप्यस्य क्लेशकर्माद्यसंगमात् ७

पि जीववदसंगश्चिद्रूपश्चेत्यर्थः ५ नन्वसंगचिद्रूपत्वे कथं नियंतृत्वमित्यत आह तथापीति ईश्वरस्य राम०
नियंतृत्वानभ्युपगमे दोषमाह अव्यवस्थाविति ६ असंगस्येश्वरस्य नियंतृत्वं निष्प्रमाणकमित्याशंक्याह १९
जीवेति तन्नियंतृत्वं श्रुतं ननु श्रुतमप्ययुक्तं कथमंगीक्रियत इत्यत आह युक्तमपीति जीवधर्मस्य क्ले
शादेरभावादुपपन्नं चेत्यर्थः ७

ननु जीवा अप्यसंगचिद्रूपाः क्लेशादिरहिता एव तथा चेश्वरे को विशेष इत्याशंक्य जीवानां स्वतः क्लेशादि
रहितत्वेपि बुद्ध्या सह विवेकाग्रहात्क्लेशादिरस्तीति पूर्वोक्तं स्मारयति जीवानामिति ८ तार्किका
स्त्वसंगस्य नियामकत्वमसहमाना जीववैलक्षण्याय ज्ञानादि गुणत्रयं नित्यमंगीकुर्वत इत्या

जीवानामप्यसंगत्वात्क्लेशादिर्न ह्यथापि च । विवेकाग्रहतः क्लेशकर्मादि प्रागुदीरि
तं ८ नित्यज्ञानप्रयत्नेच्छागुणानीशस्य मन्वते । असंगस्य नियंतृत्वमयुक्तमिति ता
र्किकाः ९ पुंविशेषत्वमप्यस्य गुणैरेव न चान्यथा । सत्यकामः सत्यसंकल्प इत्यादिश्रु
तिर्जगौ १०

ह नित्यज्ञानेति ९ नन्विच्छादिगुणकस्य कथं जीवाद्वैलक्षण्यमित्याशंक्य गुणा
नां नित्यत्वादेवेति परिहरति पुंविशेषत्वमिति गुणानां नित्यत्वे प्रमाणमाह सत्येति १० तत्रापि
दोषसद्भावात्सिद्धांतमाह छ

पंचदशी· नित्येति तस्य हिरण्यगर्भस्य किंरूपमित्यत आह लिंगदेहेनेति मायोपाधिकः परमात्मा लिंगशरीर सम चित्रदी·
१ ष्ट्यभिमानेन हिरण्यगर्भ इत्युच्यते इत्यर्थः ११ हिरण्यगर्भस्येश्वरत्वे किंप्रमाणमित्यत आह उद्गीथे

नित्यज्ञानादिमत्वेऽस्यसृष्टिरेवसदाभवेत् हिरण्यगर्भईशोऽतोलिंगदेहेनसंयुतः ११
उद्गीथब्राह्मणेतस्यमहात्म्यमतिविस्तृतं लिंगसत्वेपिजीवत्वंनास्यकर्माद्यभावतः १२
स्थूलदेहंविनालिंगदेहोनक्वापिदृश्यते वैराजोदेहईशोतःसर्वतोमस्तकादिमान् १३

ति ननुलिंगशरीरयोगेजीवःस्यादित्याशंक्याविद्याकामकर्माद्यभावान्नजीवइत्याह लिंगसत्वेपीति ग्रम०
१२ केवललिंगशरीरस्यस्थूलशरीरंविहायानुपलभ्यमानत्वात्स्थूलशरीरसमष्ट्यभिमानी वि २०
राडेवेश्वरइत्याह स्थूलदेहंविनेति १३

तत्सद्भावेप्रमाणमाह सहस्रशीर्षेति श्रुतंवाक्यमितिशेषः विश्वरूपस्यचिंतकाःविराडुपासकाः
१४ अत्रापिदोषदृष्ट्यादेवतांतरमालंबनत इत्याह सर्वत इति १५ एवंकेरूच्यत इत्यत आह पु

सहस्रशीर्षेत्येवंचविश्वतश्चक्षुरित्यपि श्रुतमित्याहुरनिशंविश्वरूपस्यचिंतकाः १४
सर्वतःपाणिपादत्वेक्रिम्यादेरपिचेशता ततश्चतुर्मुखोदेहएवेशोनेतरःपुमान् १५
पुत्रार्थंतमुपासीनाएवमाहुःप्रजापतिः प्रजाअसृजतेत्यादिश्रुतिंचोदाहरंत्यमी १६
विष्णोर्नाभेःसमुद्भूतोवेधाःकमलजस्ततः विष्णुरेवेशइत्याहुर्लोकेभागवताजनाः १७
शिवस्यपादावन्वेष्टुंशार्ङ्ग्यशक्तस्ततःशिवः ईशोनविष्णुरित्याहुःशैवाआगममानिनः १८
पुरत्रयंसादयितुंविघ्नेशंसोप्यपूजयत् विनायकंप्राहुरीशंगाणपत्यमतेरताः १९

त्रार्थमिति प्रजापतिःप्रजाअसृजतेत्यादिवाक्यंतत्रप्रमाणमित्याहुरित्याह प्रजापतिरिति १६ भागव
मतमाह विष्णोरिति १७ शैवानांमतमाह शिवस्येति १८ गाणपत्यमतमाह पुरत्रयमिति १९

उक्तन्यायमन्यत्राप्यतिदिशति एवमिति अन्येप्येवमेवेशाद्युपासकाः अन्यथान्यथा वर्णने का
रणमाह स्वस्वेति तत्र तत्र प्रमाणानि संतीति दर्शयति मंत्रेति २० एवं कतिमतानीत्याशंक्यासंख्या
न्यानीत्याह अंतर्यामिणमिति स्थावरेशवादीनक्वापीश्वर इत्याशंक्याह अश्वत्थेति २१ न

एवमन्ये स्वस्वपक्षाभिमानेनान्यथान्यथा मंत्रार्थवादकल्पादीनाश्रित्य प्रतिपेदिरे २० ॥
अंतर्यामिणमारभ्य स्थावरांतेशवादिनः सन्त्यश्वत्थार्कवंशादेः कुलदैवत्वदर्शनात् २१
तत्त्वनिश्चयकामेन न्यायागमविचारिणां एकैव प्रतिपत्तिः स्यात्साप्यत्र स्फुटमुच्यते २२

नेवं मतभेदे कस्योपादेयत्वं कस्य वा हेयत्वमित्याकांक्षायामाह तत्त्वनिश्चयेति तत्त्वनिश्चयकामेन तत्त्व
निश्चयेच्छयान्यायागमयोर्विचारणशीलानां पुरुषाणां प्रतिपत्तिरेकैव स्यात् साकीदृशीत्यत आह सोऽप्य
त्रेति २२

तामेव प्रतिपत्तिं दर्शयितुं तदनुकूलां श्रुतिं पठति मायां त्विति मायामेव प्रकृतिं जगदुपादानकार
णं विद्याज्जानीयात् मायिनं तु मायोपाधिकं अंतर्यामिणमेव महेश्वरं मायाधिष्ठातारं निमित्तं जग
द्व्याप्तमित्युक्तकारणं जानीयात् अस्य मायिनो महेश्वरस्यावयवभूतैरंशरूपैश्चराचरात्मकैर्जीवैः कृत्स्न

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् २३
इति श्रुत्यनुसारेण न्यायो निर्णय ईश्वरे तथा सत्यविरोधः स्यात्स्थावरांतेशवादिनां २४

कृत्स्नमिदं जगद्व्याप्तमित्यस्याः श्रुतेरर्थः २३ एतच्छ्रुत्यनुसारेणैश्वरविषयो निर्णयो युक्त इत्याह
इतीति कुतो युक्त इत्याशंक्य सर्वत्राविरुद्धत्वादित्याह तथेति सर्वस्यापीश्वरत्वाभ्युपगमे क्वे
नापि विरोध इति भावः २४

पंचदशी ६ ननुजगत्प्रकृतिभूतायाः मायायाः किंरूपमित्यतआह मायाचेयमिति कुतइत्यतआह तापनीय चित्रदी०
इति मायाचतमोरूपेति तापनीयोपनिषदितमोरूपत्वस्याभिधानादित्यर्थः २५ मायायास्तमो
रूपत्वे किं प्रमाणमित्याकांक्षायामनुभूतेरितिश्रुतिरेवात्रानुभवः प्रमाणमिति प्रतिजानीत इ

मायाचेयंतमोरूपातापनीयेतदीरणात् अनुभूतिंतत्रमानंप्रतिजज्ञेश्रुतिःस्वयं २५ जडं
मोहात्मकंतच्चेत्यनुभावयतिश्रुतिः आबालगोपंस्पष्टत्वादानंत्यंतस्यसाब्रवीत् २६ अ
चिदात्मघटादीनांयत्स्वरूपंजडंहितत् यत्रकुंठीभवेद्बुद्धिःसमोहइतिलौकिकाः २७

त्याह अनुभूतिमिति तत्रमायास्तमोरूपत्वेकोसावनुभवइत्याकांक्षायांतदेतज्जडंमोहात्मकमितिश्रुति राम०
रेवात्रानुभवंस्पष्टयतीत्याह जडमिति अनंतमिति श्रुत्यासर्वानुभवसिद्धत्वमुच्यतइत्याह आबालेति २२
२६ जडशब्दस्यार्थमाह अचिदात्मेति मोहशब्दार्थमाह यत्रेति २७

उक्तप्रकारेणसर्वानुभवसिद्धत्वेलक्षणमानंतंसिद्धमित्याह इत्थमिति एतज्जडमोहलक्षणंतमोरूप
त्वं नन्वेवंमायायाःसर्वानुभवसिद्धत्वेघटादिवत् ज्ञानेनाऽनिवर्त्यत्वंस्यादित्याशंक्याह युक्तीति तु
शब्दःशंकानिवृत्त्यर्थः अनिर्वाच्यंसत्त्वेनासत्त्वेनसदसत्त्वेनवानिर्वक्तुमशक्यं तत्रकिंप्रमाणमित्य
तआह नासदिति २८ अस्याःश्रुतेरभिप्रायमाह नासदिति बाधनान्नेहनानास्तिकिंचनेतिश्रुत्यानि

इत्थंलौकिकदृष्ट्यैतत्सर्वैरप्यनुभूयते युक्तिदृष्ट्यात्वनिर्वाच्यंनासदासीदितिश्रुतेः २८ नास
दासीद्विभातत्वान्नोसदासीच्चबाधनात् विद्यादृष्ट्याश्रुतंतुच्छंतस्यनित्यनिवृत्तितः २९
तुच्छाऽनिर्वचनीयाचवास्तवीचेत्यसौत्रिधा ज्ञेयामायात्रिभिर्बोधैःश्रौतयौक्तिकलौकिकैः ३०

षेधादित्यर्थः सदसद्रूपत्वेतुविरुद्धत्वादयुक्तमितिश्रुत्योपेक्षिते एवंयुक्तिदृष्ट्याऽनिर्वचनीयत्वंप्रदर्श्यतुच्छमि
दंरूपमस्येतिश्रुतिर्विद्वदनुभवेनतस्यास्तुच्छत्वंदर्शयतीत्याह विद्येति तुच्छत्वेहेतुमाह तस्येति २९
उपपादितमर्थमुपसंहरति तुच्छेति ३०

पंचदशी० श्रौतबोधे नतु श्राकालत्रयेप्यसतीयौक्तिकबोधेनानिर्वचनीयालौकिकबोधेन वास्तवीचेत्येवंत्रिधा मायाज्ञे चित्रदी०
१ येत्यर्थः ३० अस्य सत्वमसत्वं च दर्शयतीति श्रुतेरर्थमस्याकृत्यमाह अस्येति एकस्या एव मायाया जगत्स
त्वासत्वप्रदर्शकत्वे दृष्टांतमाह प्रसारणादिति ३१ स्वतंत्रास्वतंत्रत्वेनेति श्रुत्या मायायाः स्वातंत्र्यास्वातंत्र्ये

अस्य सत्वमसत्वं च जगतो दर्शयत्यसौ प्रसारणाच्च संकोचाद्यथा चित्रपटस्तथा ३१ अस्वतं
त्रा हि मायास्यादप्रतीतेर्विना चितिं स्वतंत्रापि तथैव स्यादसंगस्यान्यथा कृतेः ३२ कूटस्था
संगमात्मानं जगत्वेन करोति सा चिदाभासस्वरूपेण जीवेशावपि निर्ममे ३३

दर्शिते तत्रोभयत्रो रा० म०
यपत्तिमाह अस्वतंत्रेति स्वभासकचैतन्यं विहायन प्रकाशत इत्यस्वतंत्रा ऽसंगस्यात्मनोन्यथाकरणे २३
स्वतंत्रापीत्यर्थः ३२ अन्यथाकरणमेवस्पष्टयति कूटस्थासंगमिति जीवेशावाभासेन करोतीति
श्रुत्युक्तं जीवेश्वरविभागं करोतीत्याह चिदाभासेति ३३

नत्वात्मनोऽन्यथाकरणे कूटस्थत्वहानिः स्यादित्याशंक्याह कूटस्थमिति ननु कूटस्थत्वाऽविघाते
न जगदादिस्वरूपत्वापादनं दुर्घटमित्याशंक्य मायाया दुर्घटैकविधायित्वान्नेदमाश्चर्यकारण
मित्याह दुर्घटेति अन्यथा मायात्वमेव न स्यादिति भावः ३४ मायाया दुर्घटकारित्वस्वभावं

कूटस्थमनुपद्रुत्य करोति जगदादिकं दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः
३४ द्रवत्वमुदके वह्नावौष्ण्यं काठिन्यमश्मनि मायायां दुर्घटत्वं च स्वतः सिध्यति नान्यतः
३५ न वेत्ति लोको यावत्तां साक्षात्तावच्चमत्कृतिं धत्ते मनसि पश्चात्तु मायैषेत्युपशाम्यति ३६

वत्त्वे दृष्टांतमाह द्रवत्वमिति उदकादीनां द्रवत्वादियथा स्वभाविकं तद्वन्मायाया दुर्घटकारित्वमित्यर्थः
३५ ननु मायाया दुर्घटकारित्वमाश्चर्यकारणं न भवतीत्युक्तमनुपपन्नं लोके मायायाश्चमत्कारहेतु
त्वदर्शनादित्याशंक्य मायाश्रयोक्तसाक्षात्कारपर्यंतमेवास्याश्चाश्चर्यकारणत्वं नोपरिष्टादित्याह नवेत्ती
ति ३६

किंचजगत्सत्यत्ववादिनो नैयायिकादीन्प्रत्येवंविधानि चोद्यानि कर्त्तव्यानि न मायावादिनं प्रतीत्याह
प्रसरंतीति ३७ मायावादिनं प्रतिचोद्यकरणेऽतिप्रसंगमाह चोद्येपीति तर्हि किं कर्त्तव्यमित्यत आह
परिहार्यमिति ३८ उक्तमेवार्थं प्रपंचयति विस्मयेति ३९ मायात्वनिश्चये तत्परिहारान्वेषणमुचि

प्रसरंति हि चोद्यानि जगद्वस्तुत्ववादिषु नचोदनीयं मायायां तस्याश्चोद्यैकरूपतः ३७ चो
द्येपि यदि चोद्यं स्यात्त्वच्चोद्ये चोद्यते मया परिहार्यं ततश्चोद्यं न पुनः प्रतिचोद्यतां ३८ विस्म
यैकशरीराया मायायाश्चोद्यरूपतः अन्वेष्यः परिहारोस्या बुद्धिमद्भिः प्रयत्नतः ३९ मायात्व
मेव निश्चेयमिति चेत्तर्हि निश्चिनु लोकप्रसिद्धमायाया लक्षणं यत्तदीक्ष्यतां ४०

तंस एव नेदानीमस्तीत्याशंक्यते मायात्वमिति मायायालक्षणसद्भावान्मायात्वनिश्चीयतामित्य
भिप्रायेणाह तर्हीति किंलक्षणमित्यत आह लोकेति ४०

तस्यापि किंलक्षणमित्यत आह ननिरूपयितुमिति ४१ दृष्टांतसिद्धंलक्षणंदार्ष्टांतिके योजयति स्पष्टमिति
४२ जगतोऽशक्यनिरूपणत्वं कथमित्याशंक्य तद्दर्शयति निरूपयितुमिति ४३ अशक्यनिरूपणत्वमे
वोदाहरणेन स्पष्टयति देहेंद्रियेति स्वभाववादीशंकते वीर्यस्येति सिद्धांती दूषयति कथंतदिति

ननिरूपयितुंशक्या विस्पष्टंभासते च या सा मायेतींद्रजालादौ लोकाः संप्रतिपेदिरे ४१ स्पष्टं
भाति जगच्चेदमशक्यं तन्निरूपणं मायामयं जगत्तस्मादीक्षस्वाऽपक्षपाततः ४२ निरूपयि
तुमारब्धे निखिलैरपि पंडितैः अज्ञानं पुरतस्तेषां भाति कक्षासु कासुचित् ४३ देहेंद्रिया
दयो भावा वीर्येणोत्पादिताः कथं कथं वा तत्र चैतन्यमित्युक्ते ते किमुत्तरं ४४ वीर्यस्यैष स्व
भावश्चेत्कथं तद्विदितं त्वया अन्वयव्यतिरेकौ यौ भग्नौ तौ वंध्यवीर्यतः ४५

अन्वयव्यतिरेकाभ्यां जानामीत्याशंक्य व्यभिचारान्मैवमित्याह वंध्यवीर्यतः वंध्यायां च तत्र वीर्यस्य सत्वा
त्कार्यानिर्वृतेयत्रवीर्यं तत्र तत्र देहादिकं इति अन्वयेति ४५

पंचदशी॰ एवं पुनः पुनः दृष्टे सति किमपि न जानामीत्येवोत्तरं देयमिति फलितमाह न जानामीति ४६ उक्तानिर्व चित्रदी॰

१

न जानामि किमप्येतद्विस्मते शरणं तव अत एव महांतोस्य प्रवदंतींद्रजालतां ४६ एतस्मा
त्किमिवेंद्रजालमपरं यद्गर्भवासस्थितं रेतश्चेतति हस्तमस्तकपदप्रोद्भूतनानांकुरं पर्याये
णशिशुत्वयौवनजरावेषैरनेकैर्वृतं पश्यत्यत्तिशृणोति जिघ्रति तथा गच्छत्यथागच्छति ४
७ देहवद्वटधानादौ सुविचार्य्याऽवलोक्यतां क्वधाना कुत्र वा वृक्षस्तस्मान्मायेति निश्चिनु ।
४८ निरुक्तावभिमानं ये दधते तार्किकादयः हर्षमिश्रादिभिस्ते तु खंडनादौ सुशिक्षिताः
४९

चनीयत्वे वृद्धसंमतिं दर्शयति एतस्मादिति ४७ न केवलं देहस्यैकस्यैव दुर्निरूपत्वं किंतु राम॰
वटवृक्षादेरपीत्याह देहवदिति ४८ नन्वस्यानिर्वचनीयत्वेपि उदयनादिभिराचार्यैः नि २५
रूपितत्वादित्याशंक्याह निरुक्ताविति ४९

उक्तार्थे सांप्रदायिकानां वाक्यं संवादयति अचिंत्या इति ५० ननु भवत्वेवं जगतोऽचिंत्यरचनात्मा
यां किं मायात्वमित्यत आह अचिंत्यरचनेति अचिंत्यरचनाशक्तिमद्यद्बीजं कारणं सैव

अचिंत्याः खलु ये भावा न तांस्तर्केषु योजयेत् अचिंत्यरचनारूपं मनसापि जगत्
खलु ५० अचिंत्यरचनाशक्तिबीजं मायेति निश्चिनु मायाबीजं तदेवैकं सुषुप्तावनु
भूयते ५१ जाग्रत्स्वप्नजगत्तत्र लीनं बीज इव द्रुमः तस्मादशेषजगतो वासनास्तत्र
संस्थिताः ५२

मायेत्यर्थः न चैवंविधं कारणं क्व दृष्टमित्यत आह मायेति ५१ कथं
तस्या जगद्वासनास्तत्र मायायां तेजत्वमित्यत आहः जाग्रदिति ततः किमित्यत आह तस्मादि
ति यतो जगत्कारणं माया ततोऽशेषजगद्वासनास्तत्र मायायां तिष्ठंतीत्यर्थः ५२

ततोपिकिंतत्राह याबुद्धिवासनाइति ननुतासुप्रतिबिंबोस्तिचेत्कुतोनानुभूयतइत्याशंक्याऽस्पष्ट
त्वादित्याह मेघेति तर्हिकुतस्तत्सिद्धिरित्यतआह अनुमीयतामिति ५३ ननुमेघांशोदकस्याऽस्पष्टा
काशप्रतिबिंबत्वेपितज्जातीयस्यघटोदकस्यस्पष्टाकाशप्रतिबिंबवतःसद्भावान्मेघाकाशानुमानंघ
टतेइह तथाविधदृष्टांताऽभावात्कथमनुमानोदयइत्याशंक्यात्रापितथाविधदृष्टांतसंपादनायाह

याबुद्धिवासनास्तासुचैतन्यंप्रतिबिंबति मेघाकाशवदऽस्पष्टचिदाभासोऽनुमीयतां ५३
साभासमेवतद्बीजंधीरूपेणप्ररोहति अतोबुद्धौचिदाभासोविस्पष्टंप्रतिभासते ५४

साभासमिति चिदाभासविशिष्टंतदेवाऽज्ञानंबुधिरूपेणपरिणममानंविस्पष्टंचिदाभासवद्भवती
तिभावः एवंचेदमनुमानंअत्रसूचितंभवति विमताबुद्धिवासनाश्चित्प्रतिबिंबवत्योभवितुमर्ह
ति धबुध्यवस्थाविशेषत्वात् बुद्धिवदिति ५४

एवंजीवेश्वरयोर्मायिकत्वंश्रुत्यक्तमुपपादितमुपसंहरति मायाभासेनेति ननुजीवेशयोर्मायिकत्वेस
मानेकथमवांतरभेदसिद्धिरित्याशंक्यस्पष्टास्पष्टोपाधिमत्वेनमेघाकाशजलाकाशयोरिवतत्सिद्धि
रित्याह मेघाकाशेति ५५ ईशस्यमेघाकाशसाम्यंस्फुटीकरोति मेघवदिति ५६ मायाप्रति

मायाभासेनजीवेशौकरोतीतिश्रुतोश्रुतं मेघाकाशजलाकाशाविवतौसुव्यवस्थितौ
५५ मेघवद्वर्ततेमायामेघस्थितनुषारवत् धीवासनाचिदाभासस्तुषारस्थखवत्स्थि
तः ५६ मायाधीनश्चिदाभासःश्रुतोमायीमहेश्वरः अंतर्यामीचसर्वज्ञोजगद्योनिःसएव
हिः ५७

बिंबस्येश्वरत्वेकिंप्रमाणमित्याशंक्यश्रुतिरेवेत्याह मायाधीनइति नकेवलमीश्वरत्वमस्यश्रु
तमपितुअंतर्यामित्वादिकमपिधर्मजातंश्रुतमस्तीत्याह अंतर्यामीति ५७

पंचदशी॰ ननु ॰वासनाप्रतिबिंबस्येश्वरत्वादिकं कथं श्रुतिसिद्धमित्याशंक्य तदुपपादिकां श्रुतिं दर्शयति सोषुप्त चित्रदी॰

1 मिति सुषुप्तस्थाने एकीभूतः प्रज्ञानघन एवेत्यादिका श्रुतिर्धीवासनाप्रतिबिंबरूपस्यानंदमयस्येश्वरत्वादिकं प्रतिपादयतीत्यर्थः ५८ नन्वानंदमयस्य सर्वज्ञत्वादिकमनुभवविरुद्धमित्याशंक्याह

सौषुप्तमानंदमयं प्रक्रम्यैवं श्रुतिर्जगौ एष सर्वेश्वर इति सोयं वेदोक्त ईश्वरः ५८ सर्वज्ञत्वादिके तस्य नैव विप्रतिपद्यतां श्रौतार्थस्याऽवितर्क्यत्वान्मायायां सर्वसंभवात् ५९ अयं यत्सृजते विश्वं तदन्यथायितुं पुमान् न कोपि शक्तस्तेनायं सर्वेश्वर इति श्रुतः ६०

सर्वज्ञत्वादिकेऽइति कुत इत्यत आह श्रौतेति इतोपि न विप्रतिपत्तिः कार्येत्याह मायायामिति ५९ राम॰

नन्वनुकूलयुक्त्यभावे श्रुतिरपि ग्रावप्लववाक्यवदर्थवादः स्यादित्याशंक्य श्रुतिप्रामाण्यसिद्धये सर्वेश्वरत्वादिकमुपपादयंति अयमिति अयमानंदमयो यज्जाग्रदादिविश्वं सृजति तत्र केनापि अन्यथाकर्तुं शक्यतेऽतोयं सर्वेश्वर इत्यर्थः ६० २७

इदानीं सर्वज्ञत्वमुपपादयति अशेषेति तत्र सौषुप्तेऽज्ञाने कारणभूते कार्यभूतानां सर्वप्राणिबुद्धीनां वासनाः निवसंति ताभिश्च वासनाभिः सर्वं जगत् क्रोडीकृतं विषयीकृतं तेन सर्वबुद्धिवासनावदज्ञानोपाधिकात्मनः सर्वज्ञत्वं उच्यते इत्यर्थः ६१ ननु यदि सर्वज्ञत्वमस्ति तर्हि तत्कुतो नानुभूयत इत्याशं

अशेषप्राणिबुद्धीनां वासनास्तत्र संस्थिताः ताभिः क्रोडीकृतं सर्वं तेन सर्वज्ञ ईरितः ६१ वासनानां परोक्षत्वात्सर्वज्ञत्वं न हीक्ष्यते सर्वबुद्धिषु तद्दृष्ट्वा वासनास्वनुमीयतां ६२

क्यं तदुपाधीनां वासनानां परोक्षत्वान्नानुभव इत्याह वासनानामिति कथं तर्हि तदवगम इत्याशंक्याह सर्वबुद्धिष्विति सर्वबुद्धिनिष्ठं सर्वज्ञत्वं स्वकारणभूतवासनागतसर्वज्ञत्वपुरःसरं भवितुमर्हति कार्यनिष्ठधर्मविशेषत्वात् पटगतरूपादिरित्यर्थः ६२

पंचदशी० सर्वज्ञत्वमुपपाद्यैषोंतर्यामीतिश्रुत्युक्तमंतर्यामित्वमुपपादयति विज्ञानमयेति अ चित्रदी०
१ न्यत्र पृथिव्यादौ तिष्ठन्यमयति यतस्तेनेत्यन्वयः ६३ अस्मिन्नर्थेंतर्यामिब्राह्मणं बृहदारण्यकस्थं प्रमा
णमिति दर्शयितुं तदेकदेशमनूद्य तदर्थं यो विज्ञाने तिष्ठन्नित्यादिवाक्यमर्थतो नुक्रामति बुद्धा

विज्ञानमयमुख्येषु कोशेष्वन्यत्र चैव हि अंतस्तिष्ठन्यमयति तेनांतर्यामितां व्रजेत् ६३
बुद्धौ तिष्ठन्नांतरस्यो धियाऽनीक्ष्यश्च धीवपुः धियमंतर्यमयतीत्येवं वेदेन घोषितं ६४ त
तुः पटे स्थितो यद्वदुपादानतया तथा सर्वोपादानरूपत्वात्सर्वत्रायमवस्थितः ६५

बिति ६४ इदानीमंतर्यामिब्राह्मणस्य प्रतिपर्यायव्याख्याने ग्रंथबाहुल्यं स्यात्तया व्याख्यानस्य राम०
सर्वपर्यायसंचारित्वसिद्धये यः सर्वेषु भूतेषु तिष्ठन्नितिपर्यायं व्याचष्टाणोयः सर्वेषु भूतेषु तिष्ठन्नित्यस्या २८
र्थे सदृष्टांतमाह तंतुः पट इति ६५

ननु उपादानतया सर्वत्रायमवस्थितश्चेत्किमिति सर्वत्र नोपलभ्यत इत्याशंक्य सर्वांतरत्वादित्याह
पटादपीति अत्रेदमनुमानं अंतरत्वतारतम्यं क्वचिद्विश्रांतं तारतम्यत्वात् परिमाणतारतम्यवदिति ६
६ न त्वांतरत्वे विश्रांते प्यश्वादिवदंतर्यामिणो दर्शनं किं न स्यादित्याशंक्य तेषामिव बाह्यत्वाभावान्न

पटादप्यांतरस्तंतुस्तंतोरप्यंशुरांतरः आंतरत्वस्य विश्रांतिर्यत्रासावनुमीयतां ६६ द्व्यां
तरत्वकक्षाणां दर्शनेप्ययमांतरः न वीक्ष्यते ततो युक्तिश्रुतिभ्यामेव निर्णयः ६७
पटरूपेण संस्थानात्पटस्तंतोर्वपुर्यथा सर्वरूपेण संस्थानात्सर्वमस्य वपुस्तथा ६८

दृश्यत इत्यभिप्रायेणाह द्व्यंतरत्वेति कुतस्तर्हि तन्निर्णय इत्यत आह तत इति अचेतनस्य चे
तनाधिष्ठानमंतरेण प्रवृत्त्यनुपपत्तिर्युक्तिः श्रुतिस्तु दाहृतैव ६७ यस्य सर्वाणि भूतानि शरीरमि
त्यस्यार्थमाह पटरूपेणेति पटरूपेणावस्थितस्य तंतोः पटः शरीरं यथा एवं सर्वरूपेणावस्थितस्य सर्वं श

पंचदशी० यः सर्वाणि भूतान्यंतरो यमयतीति वाक्यतात्पर्यं सदृष्टांतमाह श्लोकद्वयेन तंतोरिति तंतुसंकोचादिना चित्रदी०
१ नापटसंकोचादिर्यथा भवति ६९ एवं पृथिव्यादिषूपादानत्वेनावस्थितोंतर्यामी यया यया वासनयाय

तंतोः संकोचविस्तारचलनादौ यथा पटः अवश्यमेव भवति न स्वातंत्र्यं पटे मनाक् ६९ तथां
तर्याम्ययं यत्र यया वासनया यथा विक्रियेत तथावश्यं भवत्येव न संशयः ७० ईश्वरः स
र्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया ७१

था यथा घटादिकां श्रुतिर्यद्रूपेण विक्रियते तथा तत्तत्कार्यजातं तथा तथाऽवश्यं भवतीति भावः ७ राम०
७० एवमंतर्यामिप्रतिपादिकां श्रुतिमुपन्यस्य स्मृतिमप्युपन्यस्यति ईश्वर इति ७१ २९

सर्वभूतानीति तेच हृदयपुंडरीके स्थिताः ननु तेषां कुतो ह्यवस्थानमित्याशंक्याह अंतर्यामिणो विज्ञान
मयाकारेण परिणामादित्याह तदुपादानेति ७२ यंत्रारूढानामत्र यंत्रारोहशब्दयोरर्थमाह देहादी
ति भ्रामयन्निति पद्ये देहवृत्त्यर्थमाह वक्ष्यविहितेति ७३ इदानीं भ्रमणमायापदयोरर्थमाह विज्ञा

सर्वभूतानि विज्ञानमयास्ते हृदये स्थिताः तदुपादानभूतेशस्तत्र विक्रियते खलु ७२ देहादिपं
जरं यंत्रं तदारोहोऽभिमानिता विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ७३ विज्ञानमयरूपेण तत्प्र
वृत्तिस्वरूपता स्वशक्त्येशो विक्रियते मायया भ्रमणं हि तत् ७४ अंतर्यमयतीत्युक्तोऽयमेवार्थः
श्रौ श्रुतौ श्रुतः पृथिव्यादिषु सर्वत्र न्यायोऽयं योज्यतां धिया ७५ जानामि धर्मं न च मे प्रवृत्तिर्जा
नाम्यधर्मं न च मे निवृत्तिः केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि ७६

नमये ७४ श्रौतस्य यमयतीति पदस्याप्ययमेवार्थ इत्याह अंतर्यमयतीति उक्तव्याख्यानं पर्यायांतरेऽप्यतिदिशति
पृथिव्यादिष्विति ७५ प्रवृत्तिजातस्य सर्वेश्वराधीनत्वे वचनांतरमुदाहरति जानामि धर्ममिति ७६

पं॰द॰टी॰ ननु प्रवृत्तेरीश्वराधीनत्वे पुरुषप्रयत्नो व्यर्थः स्यादित्याशंक्य पुरुषप्रयत्नस्यापीश्वररूपत्वान्नैवमिति परिहरति चित्रदी॰
नार्थ इति अर्थः श्रेयोजनं पुरुषकारः पुरुषप्रयत्नः ७७ ननु पुरुषप्रयत्नस्यापीश्वररूपत्वे यमयति आ
मयतीति श्रुतिपादितमंतर्यामिप्रेरणं वृथा स्यादित्याशंक्य तद्बोधेन स्वात्मासंगत्वज्ञानजन्मफलस्य स

नार्थः पुरुषकारेणेत्येवं माशंक्यतां यतः ईश्वरः पुरुषकारस्य रूपेणापि विवर्त्तते ७७ ईदृग्बोधे
नेश्वरस्य प्रवृत्तिर्नैव वार्यतां तथापीशस्य बोधेन स्वात्मासंगत्वधीजनिः ७८ तावता मुक्ति
रित्याहुः श्रुतयः स्मृतयस्तथा श्रुतिस्मृती ममैवाज्ञे इत्यपीश्वरगर्जितं ७९

स्य सत्वान्नैवमिति परिहरति ईदृगिति ईदृग्बोधेनेशस्य पुरुषकारादिरूपेणावस्थानज्ञानेन राम॰
प्रवृत्तिः अंतर्यामिरूपेण प्रेरणं ७८ आत्मनोऽसंगत्वज्ञानेनापि किं प्रयोजनमित्यत आह ३०
तावतेति श्रुतिस्मृत्यादि तस्यानतिलंघनीयत्वे स्मृतिं दर्शयति श्रुतिस्मृती इति ७९

श्रुत्यापीश्वरस्य प्रीतिहेतुत्वमुक्तमित्याह आज्ञाया इति ईश्वरस्य प्रीतिहेतुत्वं किमर्थमुक्तमित्याशंक्य स
र्वेश्वरत्वस्यांतर्यामित्वतः पार्थक्यसिद्धय इति मत्वाह सर्वेश्वरत्वमिति ८० बहिरंतश्चेश्वर एव नियाम
क इत्यत्र श्रुतिद्वयमाह एतस्य वा इति ८१ क्रमप्राप्तस्य योनिरित्यस्यार्थमाह जगद्योनिरिति

आज्ञायाः प्रीतिहेतुत्वं प्रीत्या स्यादिति हि श्रुतं सर्वेश्वरत्वमेतस्यांतर्यामित्वतः पृथक् ८० एत
स्य वा अक्षरस्य प्रशासन इति श्रुतिः अंतः प्रविष्टः शास्ताऽयं जनानामिति च श्रुतिः ८१
जगद्योनिर्भवेदेष प्रभवाप्ययकृत्वतः आविर्भावतिरोभावावुत्पत्तिप्रलयौ मतौ ८२

प्रतिज्ञातार्थे प्रभवाप्ययौ हि भूतानामिति वाक्यं हेतुत्वेन योजयति प्रभवेति प्रभवाप्ययावुत्पत्तिप्र
लयौ तत्कर्तृत्वाज्जगद्योनिरित्यर्थः उक्तौ सन्निपलयशाद्यौ विवक्षितमर्थमाह आविर्भावेति
उत्पत्तिप्रलययोराविर्भावतिरोभावौ मतावितियोजना ८२

आविर्भावकारित्वं सदृष्टांतमुपपादयति आविर्भावयतीति यथा संकुचितश्चित्रपटः स्वस्य प्रसारणेन चित्रदी॰
स्वनिष्ठानि चित्राण्याविर्भावयति एवमीश्वरोपीत्यर्थः ८३ तस्यैव प्रलयकारणत्वं दर्शयति पुनरिति स एव प
टः संकुचितश्चित्राणि यथा तिरोभावयति तद्वदित्यर्थः ८४ आविर्भावतिरोभावयोर्दृष्टांतांतराणि द

आविर्भावयति स्वस्मिन् विलीनं सकलं जगत् प्राणिकर्मवशादेष पटो यद्वत्प्रसारितः ८३ पुन
स्तिरोभावयति स्वात्मन्येवाखिलं जगत् प्राणिकर्मक्षयवशात्संकोचितपटो यथा ८४ रात्रि
घस्रौ सुप्तिबोधौ उन्मीलननिमीलने तूष्णींभावमनोराज्ये इव सृष्टिलया विमौ ८५ आ
विर्भावतिरोभावशक्तिमत्त्वेन हेतुना आरंभपरिणामादिचोद्यानां नात्र संभवः ८६

र्शयति रात्रिघस्राविति घस्रोहः ८५ नचेश्वरस्य जगद्योनित्वं किमारंभकत्वेन किं वा तदाका राम॰
रपरिणामित्वेन नाद्यः अद्वितीयस्यारंभकत्वायोगात् न द्वितीयः निरवयवस्य परिणामासंभ ३१
वादित्याशंक्य विवर्तवादाश्रयणेनायं दोष इति परिहरति आविर्भावेति १८६

नन्वेक एवेश्वरः कथं जडचेतनजगदुपादानं भविष्यतीत्याशंक्योपाधिप्राधान्येनाचेतनोपा
दानं चित्प्राधान्येन चेतनोपादानं च भविष्यतीत्याह अचेतनानामिति ८७ ननु मायाविन
ईश्वरस्य जगत्कारणत्वप्रतिपादनमनुपपन्नं सुरेश्वराचार्यैः परमात्मन एव तदभिधानादिति शं

अचेतनानां हेतुः स्याज्जाड्यांशेनेश्वरस्तथा चिदाभासांशतस्त्वेषु जीवानां कारणं भवेत् ८७
तमःप्रधानः क्षेत्राणां चित्प्रधानश्चिदात्मनां परः कारणतामेति भावनाज्ञानकर्मभिः ८८

क्यते श्लोकांतमःप्रधान इति तमःप्रधानः तमोगुणप्रधानमायोपाधिकः क्षेत्राणां शरीरादीनां भा
वनाज्ञानकर्मभिः भावना संस्कारः ज्ञानं देवताध्यानादि कर्म पुण्यापुण्यलक्षणं तैर्निमित्तभू
तैरित्यर्थः १८८

त्वंपदार्थ इव तत्पदार्थेप्यधिष्ठानारोपयोरन्योन्याध्यासस्य विवक्षितत्वान्नैवमिति परिहरति
अन्योन्याध्यासमिति ॥ ८८ ॥ नन्वसुरेश्वराचार्यैरीश्वरब्रह्मणोरन्योन्याध्याससिद्धवत्कृत्य सत्यवद्भूत इ
तिकुतोवगम्यत इत्याशंक्य श्रुत्यर्थपर्यालोचनवशादिति दर्शयितुं श्रुतिमर्थतः पठति ॥ सत्य

इति वार्त्तिककारेण जडचेतनहेतुना ॥ परमात्मन एवोक्ता नेश्वरस्येति चेन्न तत् ॥ ८९ ॥ अ
न्योन्याध्यासमत्रापि जीवकूटस्थयोरिव ॥ ईश्वरब्रह्मणोः सिद्धं कृत्वा ब्रूते सुरेश्वरः ॥ ९० ॥ स
त्यं ज्ञानमनन्तं यद्ब्रह्म तस्मात्समुत्थिताः ॥ खं वाय्वग्निजलोर्व्योषध्यन्नदेहा इति श्रुतिः ॥ ९१ ॥ आ
पातदृष्टितस्तत्र ब्रह्मणो भाति हेतुता ॥ हेतोश्च सत्यता तस्मादन्योन्याध्यास इष्यते ॥ ९२ ॥ छे

मिति ॥ ९१ ॥ नन्वत्वेषा श्रुतिः ॥ कथमन्योन्याध्यासावगतिरित्यत आह ॥ आपातेति ॥ तत्र तस्यां श्रु राम०
तौ सत्यादिलक्षणस्य निर्गुणस्य ब्रह्मणो जगत्कारणत्वं जगत्कारणस्य मायाधीनचिदाभासस्य च ३२
सत्यत्वमापाततः प्रतीयमानमन्योन्याध्यासमन्तरेण न घटत इति भावः ॥ ९२ ॥

एवमन्योन्याध्याससिद्धमीश्वरब्रह्मणोरेकत्वं पूर्वत्रोदाहृतघटितपटदृष्टान्तस्मारणेन दृढयति अ
न्योन्येति ॥ ९३ ॥ अनयोरैकत्वापत्तौ दृष्टान्तमभिधायापातदर्शिनां भेदाप्रतीतौ पूर्वोक्तमेव दृष्टान्तान्तरं
दर्शयति ॥ मेघाकाशेति ॥ ऐक्यं पश्यन्ति न भेदमित्यर्थः ॥ ९४ ॥ कुतस्तर्हि ब्रह्मेशयोर्भेदावगति

अन्योन्याध्यासरूपोसावन्नलिप्तपटी यथा ॥ घट्टितेनैकतामेति तद्वद्भ्रान्त्यै
कतां गतः ॥ ९३ ॥ मेघाकाशमहाकाशौ विविच्येते न पामरैः ॥ तद्वद्ब्रह्मे
शयोरैक्यं पश्यन्त्यापातदर्शिनः ॥ ९४ ॥ उपक्रमादिभिर्लिंगैस्तात्पर्यस्य वि
चारणात् ॥ असंगं ब्रह्म मायावी सृजत्येव महेश्वरः ॥ ९५ ॥

रित्यत आह ॥ उपक्रमादिभि पं
रिति ॥ उपक्रमोपसंहारावभ्यासोऽपूर्वता फलं ॥ अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये
इत्युक्तैः षड्विधैर्लिंगैः श्रुतितात्पर्यावधारणे सति ब्रह्मासंगं मायावि स्रष्टेत्यावगतिरिति शेषः ॥ म्यत
॥ ९५ ॥

पंचदशी॰ श्रुतावुपक्रमोपसंहारैकरूप्यदर्शनेनोक्तं ब्रह्मणोऽसंगत्वं स्पष्टयति सत्यमिति । अतोऽसंगत्व चित्रदी॰
निर्णयो भवतीति शेषः ॥ ९६ ॥ मायाविन ईश्वरस्य ईशत्वप्रतिपादिकां श्रुतिमर्थतो दर्शयति । मा
यीति । अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्ध इति श्रुतिरीश्वरस्य स्रष्टृत्वं जीव

सत्यं ज्ञानमनंतं चेत्युपक्रम्योपसंहृतं । यतो वाचो निवर्तंत इत्यसंगत्व
निर्णयः ॥ ९६ ॥ मायी सृजति विश्वं सन्निरुद्धस्तत्र मायया । अन्य इत्यप
रा ब्रूते श्रुतिस्तेनेश्वरः सृजेत् ॥ ९७ ॥ आनंदमय ईशोऽयं बहु स्या
मित्यवैक्षत । हिरण्यगर्भरूपोऽभूत्सुप्तिः स्वप्नो यथा भवेत् ॥ ९८ ॥

स्य तत्र जगति बद्धत्वं दर्शयतीत्यर्थः ॥ ९७ ॥ एवमानंदमयस्येश्वरस्य जगत्कारणत्वं प्रतिपाद्य तस्माज्जगदु राम॰ २२
त्पत्तिप्रकारमाह । आनंदमय इति । ईक्षित्वा च हिरण्यगर्भरूपोऽभूदित्यन्वयः । तत्र दृष्टांतमाह सुप्तिरिति
॥ ९८ ॥

तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादौ क्रमेण सृष्टिश्रवणादिदं सर्वमसृजतेति युगपच्छ्रवणाच्चैक
स्योपादेयत्वं कस्य वा हेयत्वमित्याकांक्षायां श्रुतियुक्त्युपेतत्वादुभयं ग्राह्यमित्याह । क्रमेणेति । एषा जगत्सृष्टि
र्द्विविधश्रुतिसद्भावात्क्रमेण युगपद्वा यथाश्रुति ज्ञेयेति योजना । तत्रोपपत्तिः द्विविधस्वप्नदर्शनादि
ति । लोके क्रमयुक्तस्य अक्रमयुक्तस्य च स्वप्नपदार्थजातस्य दर्शनादिति भावः ॥ ९९ ॥ हिरण्यगर्भस्य स्व

क्रमेण युगपद्वैषा सृष्टिर्ज्ञेया यथाश्रुति । द्विविधश्रुतिस
द्भावाद्द्विविधस्वप्नदर्शनात् ॥ ९९ ॥ सूत्रात्मा सूक्ष्मदेहाख्य
ः सर्वजीवघनात्मकः । सर्वाहंमानधारित्वात्क्रियाज्ञानादिशक्तिमान् ॥ १०० ॥
रूपं निरूपयति । सूत्रात्मेति । सूत्रात्मा पटे सूत्रमिव जगत्यनुस्यूत आत्मा स्वरूपं यस्य स सूक्ष्मदेह इत्याख्या
यस्य स तथाविधः सर्वजीवघनात्मकः सर्वेषां जीवानां लिंगशरीरोपाधिकानां घनात्मकः समष्टिरूपः त
त्र हेतुः सर्वाहंमानेति । सर्वेष्वपि लिंगशरीरेष्वहमभिमानवत्त्वादिति भावः । इच्छाज्ञानक्रियाशक्तिमां
श्री २०

 हिरण्यगर्भावस्थायां जगत्प्रतीतौ दृष्टांतमाह प्रत्यूष इति प्रत्यूष उषःकालः ॥१॥ एवं लोकप्रसिद्धदृ
ष्टांतमभिधाय यथा धौत इति पूर्वोक्तश्लोके निर्दिष्टं लांछितं पदं दृष्टांतयति सर्वत इति यथा घट्टितः
पटो मषीमयैराकारविशेषैर्लांछितो भवति तथा मायिन ईश्वरस्य वपुरपंचीकृतभूतकार्यैर्लिंगश

प्रत्यूषे वा प्रदोषे वा मग्नो मंदे तमस्ययं। लोको भाति यथा तद्वदस्पष्टं जगदीक्ष्यते ॥२१॥ सर्व
तो लांछितो मष्या यथा स्याद्घट्टितः पटः। सूक्ष्माकारैस्तथेशस्य वपुः सर्वत्र लांछितं ॥२.२॥ स
स्यं वा शाकजातं वा सर्वतोंकुरितं यथा। कोमलं तद्वदेवैष पेलवो जगदंकुरः ॥३॥ आतपाक्रां
तलोको वा पटो वा वर्णपूरितः। सस्यं वा फलितं यद्वत्तथास्पष्टं वपुर्विराट् ॥४॥

रीरैर्लांछितमित्यर्थः ॥२॥ बुध्यारोहाय वैश्वरूपे वा दृष्टांतांतरमाह सस्यं वेति ॥३॥ एवं सूत्रात्मस्वरूपं विशदीकृत्य
तस्यैवावस्थांतरं पंचीकृतभूतकार्योपाधिकं विराट् दृष्टांतत्रयेण विशदयति आतपेति सूर्योदयानं
तरमातपेन प्रकाशितो लोक आतपाक्रांतलोकः ॥४॥

तस्य सर्वात्मत्वे प्रमाणमाह विश्वरूपेति विश्वरूपाध्यायादौ कीदृग्रूपमुदितमित्याकांक्षायां ब्रह्मा
दिस्तंबपर्यंतं जगत्तद्रूपमुदितमित्याह धात्रादीति ॥५॥ एतावता प्रकृते किमायातमित्या

विश्वरूपाध्याय एष उक्तः सूक्तेपि पौरुषे। धात्रादिस्तंबपर्यंतानेतस्यावयवान्विदुः ॥५॥ ईश
सूत्रविराड्वेधोविष्णुरुद्रेंद्रवह्नयः। विघ्नभैरवमैरालमारिकायक्षराक्षसाः ॥६॥ विप्रक्षत्रि
यविट्शूद्रा गवाश्वमृगपक्षिणः। अश्वत्थवटचूताद्या यवव्रीहितृणादयः ॥७॥ जलपा
षाणमृत्काष्ठवास्याकुद्दालकादयः। ईश्वराः सर्व एवैते पूजिताः फलदायिनः ॥८॥

शंक्यां तर्यपि प्रसन्नति कुद्दालकादिपर्यंतं वस्तुजातं प्रत्येकमीश्वरत्वेन पूज्यतामित्याह ईशेत्यादिश्लोकत्र
येण ॥८॥

तं यथा यथोपासते तत्तदेव भवतीति श्रुतिस्तत्र तत्पूजातस्तत्फलसद्भावे प्रमाणमित्याह । यथा यथेति । न
नु सर्वेषामीश्वरत्वे फलवैषम्यं कुत इत्याशंक्य पूजानामधिष्ठानानां पूजानामर्च्यादीनां च सात्विकादि
भेदेनैव वैषम्यमित्याह । फलोत्कर्षेति ॥ ९ ॥ सांसारिकफलसिद्धिरेवं भवतु मुक्तिः कस्योपासनाद्भवती

यथा यथोपासते तं फलमीयुस्तथा तथा । फलोत्कर्षापकर्षौ तु पूज्यपूजानुसारतः ॥ ९ ॥
मुक्तिस्तु ब्रह्मतत्वस्य ज्ञानादेव न चान्यथा । स्वप्नबोधं विना नैव स्वस्वप्नो हीयते यथा ॥ १० ॥

त्याशंक्य ज्ञानव्यतिरेकेण न केनापि भवतीत्याह । मुक्तिरिति । तत्र दृष्टांतमाह । स्वप्नबोधमिति । स्वजा
गरणमंतरेण स्वनिद्राकल्पितस्वप्नो यथा न निवर्त्तते तथा ब्रह्मतत्वज्ञानमंतरेण तद्ज्ञानकल्पितं
स्वसंसारो न निवर्त्तत इति भावः ॥ १० ॥

ननु द्वैतनिवृत्तिलक्षणाया मुक्तेः स्वप्नदृष्टांतेन तत्वबोधसाध्यत्वविधानमनुपपन्नं निवर्त्यस्य द्वैतस्य स्वप्नतुल्यत्वाभा
वादित्याशंक्य ग्रहणरूपत्वेन स्वप्नतुल्यत्वमस्त्येव त्रयमेतत्सुषुप्तं स्वप्नमायामात्रमिति श्रुत्यापि हि
तत्वान्नैवमित्याह । अद्वितीयेति । ईशजीवादिरूपेण वर्त्तमानं चेतनाचेतनात्मकं यदखिलं जगदस्ति अयमद्विती
यब्रह्मतत्वे स्वप्न इति योजना ॥ ११ ॥ ननु ईशजीवयोर्ब्रह्माभिन्नयोः कथं जगदंतःपातित्वमित्याशंक्य तयो

अद्वितीयब्रह्मतत्वे स्वप्नोयमखिलं जगत् । ईशजीवादिरूपेण चेतनाचेतनात्मकं ॥ ११ ॥
आनंदमयविज्ञानमयावीश्वरजीवकौ । मायया कल्पितावेतौ ताभ्यां सर्वं प्रकल्पितं ॥ १२ ॥ ईक्षणा
दिप्रवेशांता सृष्टिरीशेन कल्पिता । जाग्रदादिविमोक्षांतः संसारो जीवकल्पितः ॥ १३ ॥

र्मायाकल्पितत्वेन जगदंतःपातित्वमित्याह । आनंदमयेति ॥ १२ ॥ ताभ्यां सर्वं प्रकल्पितमित्युक्तं तत्र के
न किं कियत्कल्पितमित्याकांक्षायामाह । ईक्षणादीति । स ईक्षत लोकान्नु सृजा इत्यादिकया एतया द्वारा
प्रापद्यतेत्यंतया श्रुत्या प्रतिपादिता सृष्टिरीश्वरकर्तृका । तस्य त्रय आवसथास्त्रयः स्वप्ना इत्यादिकया स एतमे
व पुरुषं ब्रह्म ततममपश्यदित्यंतया प्रतिपादितः संसारो जीवकर्तृक इत्यर्थः ॥ १३ ॥

ननुब्रह्मण एव पारमार्थिकत्ववादिनां जीवेश्वरतत्वविषयाविप्रतिपत्तिः कुत इत्याशंक्याश्रुतिसिद्धत
त्वज्ञानशून्यत्वादित्याह अद्वितीयमिति १४ जीवेश्वरविषयायावादिविप्रतिपत्तेरज्ञानमूलत्वे
तथाविधं तत्वं तेबोधनीयमित्याशंक्यदृष्याश्रमत्वान्नेत्याह ज्ञात्वेति १५ ईश्वरेजीवेचभ्रांत्याविप्र

अद्वितीयं ब्रह्मतत्वमसंगं तन्नजानते जीवेशयोर्मायिकयोर्वृथैवकलहं ययुः १४
ज्ञात्वासदा तत्वनिष्ठाननुमोदामहे वयं अनुशोचाम एवान्यान्नभ्रांतैर्विवदामहे १५
तृणार्चकादियोगांता ईश्वरेभ्रांतिमाश्रिताः लोकायतादिसांख्यांता जीवविभ्रांतिमाश्रिताः
१६ अद्वितीयब्रह्मतत्वं नजानंतियदातदा भ्रांताएवाखिलास्तेषां क्वमुक्तिः क्वेहवासुखं १७

तिपन्नान्वादिनोविभज्यदर्शयति तृणार्चकादीति १६ कुतोभ्रांतत्वं तेषामित्यतआह अद्वितीये
ति ततः किंतत्राह तेषामिति परिगृहीतपक्षप्रतिपादनाभिनिवेशेनचित्तविक्षेपसद्भावान्नैहि
कमपिसुखं तेषामित्याह क्वेहवासुखमिति १७

ननुतेषां ब्रह्मविद्याऽभावेपि इतरविद्याप्रयुक्त उत्तमाधमभावो दृश्यतेऽतउत्तमत्वप्रयुक्तं सुखं केषांचि
त्स्यादित्याशंक्यतस्य मुमुक्षुभिरनादरणीयत्वं दृष्टांतेनाह उत्तमाधमेति १८ जीवेश्वरवादयोर्मुक्ति
हेतुत्वाभावान्नमुमुक्षुभिस्तत्रमतिर्निवेशनीयेत्युपसंहरति तस्मादिति तर्हि किंकर्तव्यमित्या
शंक्यश्रुतिविचारेण ब्रह्मबोधएवकर्तव्यइत्याह किंत्विति १९ ननुब्रह्मतत्वनिनिश्चयायत

उत्तमाधमभावश्चेत्तेषां स्यादस्तु तेनकिं स्वप्नस्थराज्यभिक्षाभ्यां नबुद्धः स्पृश्यतेखलु १८ तस्मा
न्मुमुक्षुभिर्नैवमतिर्जीवेशवादयोः कार्याकिंतुब्रह्मतत्वंविचार्यबुध्यतेचतत् १९ पूर्व
पक्षतयातौचेत्तत्वनिर्णयहेतुतां प्राप्नुतोऽस्तुनिमज्जस्वतयोर्नैतावताऽवशः २०

योःस्वरूपंहेयत्वेनज्ञातव्यमित्याशंक्यतथात्वेजीवेशवादयोरेवबुद्धिर्नपरिसमापनीयेत्याह पूर्वपक्षत
येति एतावतापूर्वपक्षतयातत्वनिर्णयहेतुत्वसंभवेनतयोर्जीवेशवादयोरवशोविवेकज्ञानशून्योन

पंचदशी ननु सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वेन त्वद्भिरभ्युपगतयोः पूर्वपक्षत्वमिति शं चित्रदी.
५ कते असंगचिदिति सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वेपि तयोर्वास्तवभेदस्य तैरंगीकारान्न
यमस्मत्सिद्धांत इत्याशंक्याह शृणु इति २१ तत्त्वंपदयोरुभावर्थावस्मत्सिद्धांततां न गताविति योजना

असंगचित्पुमाञ्जीवः सांख्योक्तस्तादृगीश्वरः। योगोक्तस्तत्त्वमोरर्थौ शुद्धौ ताविति चेच्छृणु। २१।
न तत्त्वमोरुभावर्थावस्मत्सिद्धांततां गतौ। अद्वैतबोधनायैव सा कक्षा काचिदिष्यते। २२।

ननु कूटस्थब्रह्मशब्दाभ्यां शुद्धौ तत्त्वंपदार्थौ त्वद्भिरपि भिन्नौ निरूपिताविंत्याशंक्याह। अद्वैतबो राम.
धनायैवेति। लोकप्रसिद्धभेदनिरासद्वारा तदैक्यप्रतिपादनायैव तौ भेदेनानूदितौ न तु तयोर्भेदः ३७
प्रतिपाद्यत इति भावः। २२। छ

तर्हि पदार्थशोधनं किमर्थमित्यत आह। अनादीति अत्र मायाशब्देन स्वाश्रयव्यामोहिकाऽविद्याल
क्षिता तया विपरीतज्ञानं भ्रांताः कर्तृत्वादिमत्त्वं जीवस्य सर्वज्ञत्वादि गुणयोगित्वं चेश्वरस्य पारमा
र्थिकं मन्यते। अतस्तन्निरसनार्थमेव शोधनं क्रियत इत्यर्थः २३ पदार्थशोधनप्रकारमेवादौ दर्शयि

अनादिमायया भ्रांता जीवेशौ सुविलक्षणौ। मन्यंते तद्व्युदासाय केवलं शोधनं तयोः। २३। अ
त एवात्र दृष्टांतो योग्यः प्रागुपपादितः। मन्यंते तं घटाकाशमहाकाशजलाकाशाभ्रखात्म
कः २४ जलाभ्रोपाध्यधीने ते जलाकाशाभ्रखे तयोः। आधारौ तु घटाकाशमहाकाशौ सु
निर्मलौ २५
सुलभदुपायत्वेन पूर्वोक्तं दृष्टांतं स्मारयति अत एवेति यतः पदार्थशोधनं कर्तव्यमत एवेत्यर्थ
: २४ पदार्थशोधनप्रकारमाह। जलाभ्रेति ये जलाकाशाभ्रखे ते जलाभ्रोपाध्यधीनत्वादपा
रमार्थिके तयोराधारभूतौ घटाकाशमहाकाशौ सुनिर्मलौ जलाद्युपाधिनिरपेक्षाकाश
मात्ररूपावित्यर्थः २५

दृष्टांतिकमाह एवमिति २६ ननु पदार्थद्वयशोधनकल्पोपयोगित्वेनापि सांख्ययोगमतद्वयमंगी
कार्यमिति चेदत्यल्पमिदमुच्यते इतरेषामपि अन्नमयादीनां तत्कल्पोपयोगित्वेनास्माभिरभ्युपेयत्वादित्याह एतदिति
२७ कुतस्तर्हि सांख्ययोगयोर्वेदांतविरोधित्वमित्याशंक्य जीवभेदजगत्सत्यत्वेश्वरतादस्थ्यलक्षणांशादित्याह आ

एवमानंदविज्ञानमयौ मायाधियोर्वशौ तदधिष्ठानकूटस्थब्रह्मणी तु सुनिर्मले २६ एतत्कल्पोपयो
गेन सांख्ययोगौ मतौ यदि देहाद्यन्नमयकल्पत्वादात्मत्वेनाऽभ्युपेयतां २७ आत्मभेदो जगत्सत्य
मीशोन्य इति चेत्त्रयं त्यज्यते तैस्तदा सांख्ययोगवेदांतसंगतिः २८ जीवोऽसंगत्वमात्रेण कृता
र्थ इति चेत्तदा स्रक्चंदनादिनित्यत्वमात्रेणापि कृतार्थता २९

आत्मभेद इति २८ ननु जीवस्यासंगत्वज्ञानादेव मुक्तिसिद्धेः किमद्वैतबोधेनेत्याशंक्याद्वैतज्ञान
मंतरेण संगत्वादिकं न संभाव्यत इत्यभिसंधिं हृदि विधायोत्तरमाह जीवइति २९

अभिसंधिमाविःकरोति यथेति जीवतोर्विशेष्यविशेषणभावेनाभिमानयोः ३० असंगत्वमेवस्पष्ट
यतु रूपमिति फलितमाह कोस्येति ३१ संगनियमनयोरविवेककार्यत्वाद्विवेकज्ञानेन चाविवेकनिवृ
त्तौ कुतः पुनः संगाद्युत्पत्तिरित्याशंकते अविवेकेति एवं सत्यपसिद्धांतापात इति परिहरति

यथा स्रगादिनित्यत्वं दुःसंपादं तथात्मनः असंगत्वं न संभाव्यं जीवतोर्जगदीशयोः ३० अवि
रूपप्रकृतिः संगं कुरुते वाऽपादयेत्तथा नियच्छतेतमीशोपि कोऽस्य मोहस्तथा सति ३१ अवि
वेककृतः संगो नियमश्चेति चेत्तदा बलादापतितो मायावादः सांख्यस्य दुर्मतेः ३२

बलादिति अयं भावः अविवेको नाम किं विवेकाभावः किं वा तदन्यः उभयत्र विरोधि नाद्यः अना
दिभावस्याभावस्य कार्यजनकत्वायोगात् न द्वितीयः विवेकादन्यस्य घटादेः संगहेतुत्वादर्शना
त् तृतीये तु तस्य भावरूपाज्ञानत्वमेवेति मायावादप्रसंग इति ३२

पंचदशी । न्वद्वैतास्युपगमे बंधमोक्षव्यवस्थानुपपत्तेरात्मभेदोंगीकर्तव्य इति चोदयति बंधमोक्षेति एकस्याप्यात्मनो मा चित्रदी ।
१ ययाबंधमोक्षव्यवस्थोपपत्तेर्मैवमिति परिहरति नयत इति ३३ मायापि कथंव्यवस्थापयेदित्याशंक्य तस्या
दुर्घटकारित्वस्वाभाव्यादित्याह दुर्घटमिति बंधस्याविद्याकल्पितमोक्षोवास्तवोस्तु येन मद्दत्ताशंकां श्रुतिवि
रोधान्नैवमित्याह वास्तवादिति न हसतेतरामतिनसहते तरांनैव सहत इत्यर्थः बंधमिव मोक्षमपि वास्तवंन सह

बंधमोक्षव्यवस्थार्थमात्मनानात्वमिष्यतां इति चेन्न यतो माया व्यवस्थापयितुं क्षमा ३३ दुर्घटं घटया
मीति विरुद्धं किं न पश्यसि वास्तवौ बंधमोक्षौ तु श्रुतिर्न सहते तरां ३४ न निरोधो न चोत्पत्तिर्न ब
द्धो न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ३५
तइत्यर्थः मोक्षादेर्वास्तवत्वं प्रतिषेधिकां श्रु राम
तिं पठति न निरोध इति निरोधो नाशः उत्पत्तिर्देहसंबंधः बंधस्तु सुखदुःखादिधर्मवान् साधकः श्रवण ३९
द्यनुष्ठाता मुमुक्षुः साधनचतुष्टयसंपन्नः मुक्तः निवृत्ताविद्यः इत्येतत्सर्वं वस्तुतो नास्तीत्यर्थः ३५

एवं जीवेश्वरादिस्य मायामयत्वमुपपादितमुपसंहरति मायाख्याया इति ३६ ननु जीवेश्वरयोर्मायिकत्वे
न तद्भेदस्य मिथ्यात्वेपि कूटस्थब्रह्मणोः पारमार्थिकत्वेन तद्भेदोपि पारमार्थिकः स्यादित्याशंक्य भेदप्रयोजक
स्य स्वरूपवैलक्षण्यस्याभावान्नैवमिति परिहरति कूटस्थेति नाममात्राद्भेदप्रतीतावपि वस्तुतो भेदाभा
वे दृष्टांतं पूर्वोक्तं स्मारयति घटाकाशेति ३७ एवं भेदस्य मिथ्यात्वसमर्थनेन किं फलमित्यत आह

मायाख्यायाः कामधेनोर्वत्सौ जीवेश्वरावुभौ यथेष्टं पिबतां द्वैतं तत्त्वं त्वद्वैतमेव हि ३६ कूट
स्थब्रह्मणोर्भेदो नाममात्रादृते न हि घटाकाशमहाकाशौ वियुज्येते न हि क्वचित् ३७ यदद्वै
तं श्रुतं सृष्टेः प्रागेवाद्य चोपरि मुक्तावपि वृथा माया भ्रामयत्यखिलान् जनान् ३८ राम

ग्ये यदद्वैतमिति सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुतौ यदद्वितीयं ब्रह्म प्रतिपादितं तदे
व कालत्रयेप्यबाध्यत्वेन वास्तवं न भेद इति भावः कुतस्तर्हि सर्वे भेदाभिनिवेशं कुर्वंतीत्यत आह
वृथा मायेति तत्त्वज्ञानरहितत्वाद् अभिनिवेशं कुर्वंतीति भावः ३८

ननु भवेत्पंचकस्य मायामयत्वं तत्कस्मा द्वितीयत्वं चये वर्णयंति ते पि संसरंतो दृश्यंते ऽतस्तत्त्वज्ञानेन किं प्रयोजनमिति शंकते येवदंतीति कर्मवशात्केषांचित्प्रवहारे सत्यपि पूर्ववद्भ्रांतिनिवेशाभावान्नै वमिति परिहरति नयथेति ३९ ज्ञानिनः भ्रांत्यभावं दर्शयितुमज्ञानिनां निश्चयं तावदाह ऐहि

ये वदंतीत्थमेतेपि भ्राम्यंते विद्ययात्र किं नयथापूर्वमेतेषामत्र भ्रांतेरदर्शनात् ३९
ऐहिकामुष्मिकः सर्वः संसारो वास्तवस्ततः नभाति नास्ति वाऽद्वैतमित्यज्ञानिविनिश्चयः ४०
ज्ञानिनां विपरीतोस्मान्निश्चयः सम्यगिष्यते स्वस्वनिश्चयतो बद्धो मुक्तोहं वेति मन्यते ४१

केति इह लोके भवः ऐहिकः पुत्रकलत्रादि पोषणरूपः अमुष्मिन्परलोके भवन्नामुष्मिकः स्वर्गसुखाद्यनुभवरूपः ४० तत्त्वज्ञविनिश्चयस्य तत्तो वैलक्षण्यं दर्शयति ज्ञानिनामिति अद्वैतं पार मार्थिकं भाति च संसारस्त्वपारमार्थिक इति निश्चय इत्यर्थः ततः किमित्याशंक्य स्वस्वनिश्चय यानुसारेण फलं भवतीत्याह स्वस्वेति ४१

अद्वैतं भाती भक्तिः शास्त्रत एव नानुभवतोऽतो न तन्निश्चय इति शंकते नाद्वैतमिति अनुभावा गोचरत्वमसिद्धमिति परिहरति नचिद्रूपेणेति घटः स्फुरति पटः स्फुरतीति घटादिष्वनुस्यूत स्फुरण रूपेण भानादित्यर्थः ननु चिद्रूपत्वस्य भानेपि तत्का र्त्स्न्येन न प्रतीयत इति शंकते अशेषेणेति साकल्येन भानाभावो द्वैतेपि समान इत्याह द्वैतं किमिति ४२ एवं दोषसाम्यमभिधाय परिहारसा

नाद्वैतमपरोक्षं चेन्न चिद्रूपेण भासनात् अशेषेण न भातं चेद्द्वैतं किं भासते खिलं ४२
दिङ्मात्रेण विभानं तु द्वयोरपि समं खलु द्वैतसिद्धिवदद्वैतसिद्धिस्ते तावता न किं ४३

म्यमाह दिङ्मात्रेणेति दिङ्मात्रेणैकदेशेन द्वयोर्द्वैताद्वैतयोरित्यर्थः एतावता कथं परिहारसा म्यमित्याशंक्याह द्वैतसिद्धिवदिति ते तव पक्षे तावताएकदेश प्रतीतिसद्भावेन द्वैतसिद्धिवद्द्वैतनि श्चय इवाद्वैतसिद्धिरद्वैतनिश्चयोपि किं न भवति किंतु भवत्येवेत्यर्थः ४३

 पूर्ववादी प्रकारांतरेणाद्वैतासिद्धिं शंकते द्वैतेनेति अद्वैतं द्वैतराहित्यं तयोः परस्परविरोधात्तथा सति
द्वैतप्रतीतावद्वैतं न संभवतीत्यर्थः ननु तर्हि द्वैतस्याप्यद्वैतविरोधित्वाद्द्वैतप्रतिभाससमाने द्वैतस्याऽ
सिद्धिरिति चोद्ये समानमित्याशंक्याह पूर्ववादी चिद्भानं त्विति न च मते चिद्रूपप्रतीतेर्द्वै य
द्वैतप्रतीतिविरोधित्वात्तस्याद्वैतस्य विरोधित्वाभावान्नानयोः साम्यमिति भावः ४४ प्रतीयमान
द्वैतेन हीनमद्वैतं द्वैतज्ञाने कथं त्विदं चिद्भानं त्वविरोधित्वादस्याद्वैतस्यातोऽसमेऽवद ४४ ए
वं तर्हि समद्वैतं द्वैतज्ञाने कथं त्विदं शृणु द्वैतमसन्मा[illegible]मयत्वतः तेन वास्तवमद्वैतं
परिशेषाद्विभासते ४५ अचिंत्यरचनारूपं मायैव सकलं जगत् इति निश्चित्य वस्तुत्वमद्वैते परिशि
ष्यतां ४६ राम.
स्यापि द्वैतस्य वास्तवत्वाभावाद्वास्तवाद्वैतविषयत्वमिति परिहरति सिद्धांती ए ४१
वमिति प्रसक्तप्रतिषेधेऽन्यत्राप्रसंगाच्छिष्यमाणे संप्रत्ययः परिशेषः ४५ परिशेषप्रकारमेव दर्शयति
अचिंत्येति न चिंत्या अचिंत्या अचिंत्या रचना रूपं यस्य तत्तथा विध्वंसकलं जगन्मायैवमित्येवेत्यनेन प्रका
रेणानिर्वचनीयत्वान्मिथ्यात्वं द्वैतस्य निश्चित्य वास्तवमद्वैतमेव परिशिष्यतामित्यर्थः ४६

नन्वेवमद्वैतनिश्चये कृतेपि पुनः पुनर्द्वैतस्य सत्यत्वं पूर्ववासनया भातीत्याशंक्य तन्निवृत्तये पुनः पुनर्मिथ्या
त्वं विचारयेदित्याह पुनर्द्वैतस्येति आवृत्तिरसकृदुपदेशादिति चतुर्थाध्याये व्यासेन श्रवणाद्यावर्तनस्य वि
हितत्वादिति भावः ४७ कियंतं कालमित्थं विचारणीयमित्याशंक्य तत्रापरोक्षविद्याप्तौ विचारोऽयं समाऽ
प्यत इति विचारकालावधिरुक्त्वात्राद्वैतविचारेऽयं खेदो युक्तः किंतु द्वैतप्रतिभासे एव स युक्त इत्याह
पुनर्द्वैतस्य वस्तुत्वं भाति चेत्त्वं तथा पुनः परिशीलय को वात्र प्रयासस्तेन ते वद ४७ कियंतं का
लमिति चेत् खेदोऽयं द्वैत इष्यतां अद्वैते तु न युक्तोऽयं सर्वानर्थनिवारणात् ४८ क्षुत्पिपासादयो
दृष्टा यथा पूर्वं मयीति चेत् मच्छब्दवाच्येऽहंकारे दृश्यतां नेति को वदेत् ४९
कियंतमिति ४८ नन्वेवमद्वैतात्मतत्त्वापरोक्षज्ञानवतोऽपि मयि क्षुत्पिपासाद्यनर्थस्य परिदृश्य
मानत्वादनर्थनिवारकत्वमात्मज्ञानस्याऽसिद्धमिति शंकते क्षुत्पिपासादय इति किं मच्छब्दवाच्ये
ऽहंकारे दृश्यते उत मच्छब्दोपलक्षिते चिदात्मनीति विकल्प्याद्यमंगीकरोति मच्छब्दवाच्य इति न द्विती
यः तस्याऽसंगत्वादविषयत्वाच्चेति बहिरेव द्रष्टव्यं ४९

तुक्तन्तस्तन्यतीत्यत्रा वेपित्नांस्यातन्नसक्तिःस्यादितिशंकते चिद्रूपेपीति एवंतर्हिनर्थहेतोरध्या
सस्यनिवृत्तयेसदाविवेकः क्रियतामित्याह माध्यामिति ५० अनादिवासनावशान्मुनःपु
नरध्यासागमनेतन्निवृत्तयेविवेकएवावर्तनीयोवोपायांतरमित्याह झटितीति ५१ ननु

चिद्रूपेपिप्रसज्येरंस्तादात्म्याध्यासतोयदि मा ध्यासंकुरुकिंतुत्वंविवेकंकुरुसर्वदा
५० झटित्यध्यासमायातिदृढवासनयेतिचेत् आवर्तयेद्विवेकंचदृढंवासयितुंसदा
५१ विवेकेद्वैतमिथ्यात्वंयुक्त्यैवेतिनगण्यतां अचिंत्यरचनात्वस्यानुभूतिर्हिस्वसा
क्षिकी ५२

विचारेणद्वैतस्यमायामयत्वंयुक्त्यैवसिध्यतिनानुभवतइत्याशंक्याचिं
त्यरचनात्वलक्षणमिथ्यात्वानुभवस्यस्वसाक्षिकत्वान्मैवमितिपरिहरति विवेकइति ५२

नचचिंत्यरचनात्वंमिथ्यापदार्थलक्षणमुक्तंचिदात्मन्यतिव्याप्तमितिशंकते चिद्रूपेति प्रागभावयुतत्वेस
त्यचिंत्यरचनात्वंमिथ्यात्वलक्षणमितिविवक्षुरचिंत्यरचनात्वमात्मनोंगीकरोति तर्ह्यस्त्विति एवमंगीकारेप
सिद्धांतएवापतेत्इत्याशंक्यापरिहरति नोवयमिति तत्रहेतुमाह नित्यत्वेति वयंचितिंसुचिंत्यरचनांनो
ब्रूमइतियोजना ५३ चितेर्नित्यत्वंकुतइत्याशंक्यप्रागभावानुभवाभावादित्याह प्रागभावइतियतश्चि
तेःप्रागभावोनानुभूतस्ततोनित्येतियोजना इदमत्राकूतं चितेःप्रागभावोस्तीतिवदन्प्रष्टव्यश्चित्प्रागभा

चिद्रूपेप्यचिंत्यरचनायदितर्ह्यस्तुनोवयं चितिंसुचिंत्यरचनांब्रूमोनित्यत्वकारणात् ५३ प्रागभा॰वोनानुभू
तश्चितेर्नित्याततश्चितिः द्वैतस्यप्रागभावस्तुचैतन्येनानुभूयते ५४

वःकिंचितानुभूयतेउताऽन्येनवाऽन्येन
तस्यजडत्वेनानुभवितृत्वानुपपत्तेःचितानुभूयतइत्यपिपक्षेकिंचिदंतरेणोतस्वेनैवनाद्यः अद्वैतवादेचिदंतरस्याभा
वात् तस्वीकारेपिचित्प्रतियोगिकस्याभावस्यचिदंतरेणग्रहीतुमशक्यत्वात्तस्यापिग्रह्यमाणत्वेघटादिव
दचित्त्वापत्तेः नापिद्वितीयःस्वाभावस्यस्वेनग्रहीतुमशक्यत्वादिति ननुद्वैतस्यचमात्राद्भिन्नेदृश्यत्वात्तद्भावस्यचतेनै
वानुभवितुमशक्यत्वात्तदनुभवितृचिदंतराभावाच्चचैतन्यवद्द्वैतस्यापिनित्यत्वापत्तिरित्याशंक्यानुभवितृचिदंतराभावोऽसि
द्धइतिपरिहरति द्वैतस्येति जाग्रदादिद्वैताभावस्यसुषुप्तौसाक्षिणानुभूयमानत्वान्नमसाःसाक्षीसर्वस्यसाक्षीतिश्रुते

पंचदशी॰ एवंच प्रागभावयुतत्वे सत्यपि चित्परचनात्वस्य मिथ्यात्वलक्षणस्य सद्भावात् द्वैतमिथ्यात्वं सिद्धमित्याह प्रागभा चित्रदी॰
वेति प्रागभावयुतमिहेतुगर्भितं विशेषणं द्वैतं प्रागभावोपेतत्वात् घटादिवद्रच्यते हि तथापि रच्यमानत्वेपि
१ तस्य द्वैतस्य रचनाऽचित्या तेन रच्यमानत्वे सति चित्परचनात्वेनेन्द्रजालवदैन्द्रजालिकप्रासादरचनेवेत्यर्थः

प्रागभावयुतं द्वैतं रच्यते हि घटादिवत् तथापि रचनां चित्यामिथ्या तेनेन्द्रजालवत् ५५
चित्प्रत्यक्षा ततोन्यस्य मिथ्यात्वं चानुभूयते नाद्वैतमपरोक्षं चेत्येतन्न व्याहृतं कथं ५६

चितिस्वात्वस्य प्रकाशत्वेन नित्यापरोक्षावभासते चिद्व्यतिरिक्तस्य च मिथ्यात्वं तथैव चितानुभूयत इति दर्शितं राम॰
५५ एवंच सत्य द्वैतस्याऽपरोक्षं नास्तीति वदतो व्याघातश्चस्यादित्याह चित्प्रत्यक्षेति चिद्रूपेणाभासनादि ४३
तन्निहितयुक्तिसमुच्चयार्थश्चशब्दः अद्वैतमपरोक्षं नेत्येतत्कथं न व्याहतं चेति योजना ५६

एवं वेदांतार्थं जानतामपि पुरुषाणां केषांचित्तत्र विश्वासः कुतो न जायत इति पृच्छति इत्थमिति सम्यग्विचा
रश्नन्यत्वादिति विवक्षुः प्रतिबंदीं गृह्णाति चार्वाकादेरिति अदिशब्देन पामरा गृह्यंते प्रबुद्धस्योहायोह
कुशलस्य ५७ प्रतिबंदीमोचनं नेरात एते सम्यगिति साम्येन समाने तथेति धीदोषादित्यनुषज्यते
तुशब्दएवशब्दार्थः ५८ इत्थं तत्त्वं विवेकाचार्यनजन्यतत्त्वज्ञानफलं विचारयितुं तम्प्रति याद् कांक्षति
इत्थं ज्ञात्वाप्यसंतुष्टाः केचित्कुत इतीर्यतां चार्वाकादेः प्रबुद्धस्यायात्मादेहः कुतो वद ५७ सम्यग्वि
चारोनास्त्यस्य धीदोषादितिचेत्तथा असंतुष्टाश्च शास्त्रार्थं नत्वेद्गत्वं विशेषतः ५८ यदा सर्वे प्रमुच्यंते
कामायेस्य हृदिश्रिताः ५९
पठति यदेति अथमर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इत्यस्य मंत्रस्योत्तरा
र्धंस्य मुमुक्षोर्हृदिश्रितायेकामास्तादात्म्याध्यासमूला इच्छाद्यः संति ते सर्वे यदा यस्मिन्काले प्रमुच्यंते तत्त्वज्ञाने
नाध्यासनिवृत्तौ निवर्तंते अपलशाना मेव मर्त्यः पूर्वं देहतादात्म्याध्यासेन मरणशीलः पुरुषः अमृतः अ
ध्यासाभावेनन तद्रहितो भवति तत्रहेतुमाह अत्रब्रह्मसमश्नुत इति अत्रास्मिन्नेव देहे ब्रह्मसत्यादिलक्ष
णं समश्नुते सम्यगाप्नोतीत्यस्याः श्रुतेरर्थः

पंचदशी · चित्रदी·

७

श्रुत्याप्रतिपादितंफलंकामनिवृत्त्यादिलक्षणंनानुभवसिद्धंकिंतुशाब्दमेवेतिशंकते इतिश्रौतमिति समनं
तरश्रुतिवाक्यतात्पर्यालोचनयातस्यदृष्टत्वंसिद्धमित्यभिप्रायेणपरिहरति दृष्टमेवतदिति ५९ तस्य
दृष्टत्वस्पष्टीकरणायतद्वाक्यमुदाहृत्यतस्यार्थमाह यदासर्वइति अनेनवाक्यशेषेणकामप्रमोक

इतिश्रौतंफलंदृष्टंनेतिचेद्दृष्टमेवतत् ५९ यदासर्वेप्रभिद्यंतेहृदयग्रंथयस्त्विति कामाग्रंथिस्वरू
पेणव्याख्यातावाक्यशेषः ६० अहंकारचिदात्मानावेकीकृत्याविवेकतः इदंमेस्यादिदंमेस्यादिती
च्छाःकामशब्दिताः ६१

स्यग्रंथित्वेनव्याख्यातत्वात्कथंग्रंथिभेदस्यचाहंकारचिदात्मनोस्तादात्म्याध्यासनिवृत्तिलक्षणस्या राम॰
नुभवसिद्धत्वान्नाप्रत्यक्षतेतिभावः वाक्यशेषतइत्यनेनवाक्येनेत्यर्थः ६१ ननुलोकेकामशब्देनेच्छा ४४
भेदएवोच्यतेऽतःकथंतस्यग्रंथित्वेनव्याख्यानमित्याशंक्याध्यासमूलस्यैवेच्छाविशेषस्यकामश
ब्दवाच्यत्वंनेच्छामात्रस्येत्याह अहंकारेति ६१

नत्वध्यासमूलस्यैवकामस्यत्यागेसतीतुरोऽप्युपेतव्यःस्यादित्याशंक्याबाधकत्वाद्दृष्टोऽप्युपेयत
एवेत्याह अप्रवेश्येति अहंकारेचिदात्मानमप्रवेशयतातादात्म्याध्यासेनानंतत्राबेत्यर्थः ६२ न
न्वध्यासाभावेकामानामनुदयएवस्यादित्याशंक्यारब्धकर्मवशात्तेषामुत्पत्तिःसंभवतीत्याह ग्रं

अप्रवेश्यचिदात्मानंपृथक्पश्यन्नहंकृति इच्छंस्तुकोटिवस्तूनिनबाधोग्रंथिभेदतः ६२ ग्रं
थिभेदेपिसंभाव्याइच्छाःप्रारब्धदोषतः बुद्ध्वापिपापबाहुल्यादसंतोषोयथातव ६३ अ
हंकारगतेच्छाद्यैर्देहव्याध्यादिभिस्तथा वृक्षादिजन्मनाशैर्वाचिद्रूपात्मनिकिंभवेत् ६४

ग्रंथिभेदेपीति तत्रदृष्टांतमाह बुद्ध्वापीति ६३ अध्यासाभावेऽहंकारगतेच्छादेरबाधकत्वंदृष्टांत
द्वयप्रदर्शनेनविशदयति अहंकारेति यथादेहगतव्याध्यादिभिरहंकारसाक्षिणोबाधोनास्तिदेहसंब
धरहितत्वाद्यथावृक्षादिगतैर्जन्मादिभिरेवमध्यासनिवृत्तावहंकारगतेच्छादिभिरपीतिभावः ६४

चिदात्मनोऽसंगत्वस्यैकरूपत्वात्पूर्वमपि कामादिबाधो नास्तीति शंकते ग्रंथिभेदादिति एवंविधबोधस्यै
व ग्रंथिभेदत्वेनास्माभिरभिधीयमानत्वादिदं चोद्यमस्मदनुकूलमित्याह तन्नविस्मरेति ६५ ए
वंविधज्ञानाभावएव ग्रंथिरित्याह नैवमिति ननु ज्ञानिनोपीच्छाद्युपगमे ज्ञान्यज्ञानिनोः कुतो वैल

ग्रंथिभेदात्पुराप्येवमिति चेत्तन्नविस्मर अयमेव ग्रंथिभेदस्तव तेन कृती भवान् ६५ नैवं जानंति
मूढाश्चेत्सोयं ग्रंथिर्न चापरः ग्रंथितद्भेदमात्रेण वैषम्यं मूढबुद्धयोः ६६ प्रवृत्तौ वा निवृत्तौ वा दे
हेंद्रियमनोधियां नकिंचिदपि वैषम्यमस्त्यज्ञानिविबुद्धयोः ६७ व्रात्यश्रोत्रिययोर्वेदपाठा
पाठकृता भिदा नाहारादावस्ति भेदः सोयं न्यायोत्र योज्यतां ६८

क्षण्यमित्याशंक्य ग्रंथिभेदाभेदातिरिक्तेन न कुतोपीत्याह ग्रंथितद्भेदेति ६६ कारणांतराभाव
मेव विशदयति प्रवृत्ताविति ६७ उक्तार्थे दृष्टांतमाह व्रात्येति ६८

ज्ञानिनो ग्रंथिभेदस्य लक्षणे गीतावाक्यं प्रमाणयति नद्वेष्टीति संप्रवृत्तानि प्राप्तानि दुःखानि न द्वेष्टि निवृत्ता
नि सुखानि न कांक्षति उदासीनवद्वर्तत इत्यर्थः ग्रंथिभिदा ग्रंथिभेदः ६९ इदं वाक्यमौदासीन्य
विधिपरं न तु ग्रंथिभेदे प्रमाणमिति शंकते औदासीन्यमिति विधिपरत्वे वच्छब्दो व्यर्थः स्यादिति परि

न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति उदासीनवदासीन इति ग्रंथिभि
दोच्यते ६९ औदासीन्यं विधेयं चेद्वच्छब्दव्यर्थता तदा न शक्ता अस्य देहा
द्या इति चेद्रोग एव स ७० तत्वबोधं क्षयव्याधिं मन्यंते ये महाधियः ते
षां प्रज्ञातिविशदा किं तेषां दुःशकं वद ७१

हरति वच्छब्देति ज्ञानिदेहादेरकार्यक्षमत्वाद्ब्रवृत्तिर्न तु ग्रंथिभेदादित्याशंक्योपहसति न शक्ता इ
ति ७० न वस्तु कोदोषस्तत्राह तत्वबोधमिति दुःशकमसाध्यमित्यर्थः ७१

नचस्थाने परिहासोयं ज्ञानिनां प्रवृत्तस्यावस्य पुराणसिद्धत्वादिति शंकते जरतादेरिति श्रुतिमजाना
नश्रोद्ध्यसीति परिहरति जक्षदिति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा वयस्यैर्वा
नोपजनं स्मरन्निदं शरीरमिति श्रौतं वाक्यं किं नाश्रौषीरित्यर्थः जक्षन् जक्षयन् जक्षन्हसनयोरि
ति धातुः क्रीडन् स्वेच्छया विहरन् रममाणः स्त्र्यादिभिर्नोपजनं स्मरन्निदं शरीरमित्युपजनानां समीपे

जरतादेर्प्रवृत्तिः पुराणोक्तेति चेन्न तत् जक्षन् क्रीडन् रतिं विंदन्नित्यश्रौषीर्न किं श्रुतिं ७२
नह्याहारादिसंत्यज्य भरताद्याः स्थिताः क्वचित् काष्ठपाषाणवत्किंतु संगभीता उदासते ७३

वर्त्तमानमिदं स्वशरीरं नस्मरन्नानुसंधान इत्यर्थः श्लोके रतिं विंदन्निति श्रौत रममाण इतिपद
स्य व्याख्यानं ७३ ननु तर्हि पुराणस्य का गतिरित्याशंक्य पुराणमप्यौदासीन्यबोधनपरं न प्रवृत्त
भावपरमित्यभिप्रेत्याह नह्याहारादिति ७३

संगोपि कुतस्त्यज्यत इत्यत आह संगीहिति ७४ ननु तर्हि मानससंगस्यैव त्याज्यत्वेऽन्तः संगशून्यानां
बहिर्व्यवहरतामसत्त्वादिकं ज्ञाने। कथमुच्यत इत्याशंक्य शास्त्रतात्पर्यज्ञानशून्यत्वादित्याह अतो

संगीहि बाध्यते लोकैर्निःसंगः सुखमश्नुते तेन संगः परित्याज्यः सर्वदा सुखमिच्छता ७४
अज्ञात्वा शास्त्रहृदयं मूढो वक्त्यन्यथान्यथा मूर्खाणां निर्णयस्त्वास्तामस्मत्सिद्धांत उच्यते
७५ वैराग्यबोधोपरमाः सहायास्ते परस्परं प्रायेण सह वर्त्तंते वियुज्यंते क्वचित् ७६
क्वचित् ७६

ज्ञात्वेति अतो मूढव्यवहारो नात्र विचारणीय इत्याह मूर्खाणामिति तर्हि किमनुसंधेयमित्याकांक्षा
यां शास्त्रहृदयमित्याह अस्मत्सिद्धांत इति ७५ कोसावित्यत आह वैराग्येति ७६

पंचदशी. १

चित्रदी.

वैराग्यादीनामन्योन्यापरिहारेणावस्थानदर्शनाद्भेदाशंकायां तद्धेत्वादीनां भेदाद्भेदोऽवगन्तव्य इत्याह
हेतुस्वरूपेति ७७ तत्र वैराग्यस्य हेत्वादित्रयं दर्शयति दोषदृष्टिरिति ७८ इदानीं तत्वबोधस्य का
रणादीनि दर्शयति श्रवणादीति आदिशब्देन मनननिदिध्यासने गृह्येते आत्मा वा अरे द्रष्टव्यः श्रो

हेतुस्वरूपकार्याणि भिन्नान्येषामसंकरः यथावदवगन्तव्यः शास्त्रार्थं प्रविविच्यता: ७७
दोषदृष्टिर्जिहासा च पुनर्भोगेष्वदीनता: असाधारणहेत्वाद्या वैराग्यस्य त्रयोऽप्यमी ७८
श्रवणादित्रयं तद्वत्तत्वमिथ्याविवेचनं पुनर्ग्रंथेरनुदयो बोधस्यैवं त्रयो मताः ७९

राम० ४१

तव्यो मंतव्यो निदिध्यासितव्य इत्यात्मदर्शनसाधनत्वेन श्रवणादिविधानाच्छ्रवणादेर्ज्ञानहेतुत्वं तत्व
मिथ्याविवेचनं कूटस्थस्याहंकारादिभ्यो भेदज्ञानं ग्रंथेरनुदयोऽन्योन्याध्यासानुत्पत्तिः ७९

उपरतेस्तानि दर्शयति यमादिरिति आदिशब्देन नियमादयो गृह्यंते धीनिरोधश्चित्तवृत्तिनिरोधलक्ष
णो योगः ८० किमेतेषां समं प्राधान्यमुत नेत्याशंक्याह तत्वबोध इति तमेव विदित्वाऽतिमृत्यु
मेति नान्यः पंथा विद्यतेऽयनायेति श्रुतेरित्यर्थः इतरयोरुपकारित्वं ब्राह्मणो निर्वेदमायान्ना

यमादिर्धीनिरोधश्च व्यवहारस्य संक्षयः स्युर्हेत्वाद्या उप
रतेरित्यसंकर ईरितः ८० तत्वबोधः प्रधानं स्यात्साक्षान्मो
क्षप्रदत्वतः बोधोपकारिणावेतौ वैराग्योपरमावुभौ ८१

स्त्यकृतः कृतेनेति तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा
त्मन्येवात्मानं पश्येदिति श्रुतिभ्यामवगम्यते ८१

पंचदशी० प्रायेण सह वर्तन्ते वियुज्यन्ते क्वचित्क्वचित् फलं तत्र कारणमाह त्रयोपीति अनेकजन्मार्जित चित्रदी०
१ पुण्यपुंजपरिपाके त्रयाणां सहभावो भवति अन्यथा तु प्रतिबंधकपापानुसारेण पुरुषविशे
षकालविशेषेण कस्यचित्प्रतिबंधो भवतीति भावः ९२ तत्रापि तत्वारा प्रतिबंधे मोक्षो नास्तीत्या

त्रयोप्यत्यंतपक्वाश्चेन्महतस्तपसः फलं दुरितेन क्वचित्किंचित्कदाचित्प्रति
बध्यते ९२ वैराग्योपरती पूर्णे बोधस्तु प्रतिबध्यते यस्य तस्य न मोक्षोस्ति पु
ण्यलोकस्तपोबलात् ९३

ह वैराग्येति तर्हि वैराग्यादिसंपादनं निष्फ राम०
लमित्याशंक्य प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः शुचीनां श्रीमतां गेहे योगभ्रष्टोभिजा ४८
यत इति भगवद्वचनात्पुण्यलोकप्राप्तिर्निर्वहतीत्याह पुण्यलोकस्तपोबलादिति ९३

वैराग्योपरत्योस्तु प्रतिबंधे जीवन्मुक्तिसुखं न सिध्यतीत्याह पूर्णे बोध इति ९४ इदानीं वैराग्या
दीनामवधिं दर्शयति ब्रह्मलोकेति ९५ अवांतरतारतम्यं स्वस्वबुध्या निश्चेयमित्याह दिशेति ९६
ननु तत्वबोधवतामपि रागादिमत्वेन वैषम्योपलंभात् ज्ञानस्यापि मुक्तिहेतुत्वं न निश्चेतुं शक्यत इ

पूर्णे बोधे तदन्यौ द्वौ प्रतिबध्यौ यदा तदा मोक्षो विनिश्चितः किंतु दृष्टदुःखं न नश्यति ९४ ब्र
ह्मलोकतृणीकारो वैराग्यस्यावधिर्मतः देहात्मवत्परात्मत्वदार्ढ्ये बोधः समाप्यते ९५ सुप्ति
वद्विस्मृतिः सीमा भवेदुपरमस्य हि दिशानया विनिश्चेयं तारतम्यमवांतरं ९६ आरब्ध
कर्मनानात्वाद्बुद्धानामन्यथान्यथा वर्तनं तेन शास्त्रार्थे भ्रमितव्यं न पंडितैः ९७

त्याशंक्य रागादेर्व्याध्यादिवत्प्रारब्धकर्मफलत्वान्मुक्तिप्रतिबंधकत्वमसिद्धमतो न शास्त्रार्थे विप्रति
पत्तव्यमित्याह आरब्धकर्मनानात्वादिति ९७

पंचदशी॰ ७ किंतर्हिश्रुतिपठनवशमित्यतआह स्वस्वेति सर्वेषांब्रह्माहमस्मीतिज्ञानमेकाकारं निरवद्यब्रह्मरूपे चित्रदी॰
णावस्थानंचसमानमितिभावः ॥ ८८ ॥ प्रकरणस्यास्यतात्पर्यं संक्षिप्यदर्शयति ॥ जगदिति ॥ ८९ ॥

स्वस्वकर्मानुसारेणवर्त्तंतांते यथातथा ॥ अविशिष्टः सर्वबोधः समामुक्तिरितिस्थितिः
॥ ८८ ॥ जगच्चित्रंस्वचैतन्येपटेचित्रमिवार्पितं ॥ माययातदुपेक्ष्यैवचैतन्येपरिशिष्यतां
॥ ८९ ॥ चित्रदीपमिमंनित्यंयेनुसंदधतेबुधाः ॥ पश्यंतोपिजगच्चित्रंतेनमुह्यंतिपूर्ववत् ॥
॥ ९० ॥

ग्रंथाभ्यासफलमाह चित्रदीपमिति ॥ २९० ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीती राम॰
र्थविद्यारण्यश्रीचरणशिष्येण रामकृष्णाख्यविदुषाविरचितंतात्पर्यबोधिनीनामकंचित्रदीप ५९
व्याख्यानंसमाप्तं ॥ छ ॥ श्रीराम